अथानुक्रमणिका॥
१तिथिनिर्णयः १
४एकभक्तविचारः
नक्तविचारः
५आयाचितव्रतं
हविष्यकथनं
६व्रतविघातकथनं
७वृद्धिनाशप्रायश्चि०
प्रतिपदानिर्णयः २०
चैत्रप्रतिपत्कृत्यं २२
८शेषप्रतिपत्कृत्यं २३
आश्विनशुक्लप्रति २४
पदिनवरात्रविधिः २५
९छत्रचामरवर्ज
दुन्दुभिशब्दवर्जवि
कासिंहासनस्यापि ४०
१८अश्वगजरथारूढा ४१
धनुश्चर्मकुंतस्व ४८
एतेषांपूजनं ५५
अत्रसूतकविचारः
१९कार्तिकव्रतनिरूपणं
गोवर्धनादिउत्सवः
द्वितीयोत्सवंचतत्र
अथतृतीयोत्सवं
चतुर्थीनिर्णयः
पंचमीनिर्णयः
षष्ठीनिर्णयः
सप्तमीनिर्णयः
अष्टमीनिर्णयः
अथनवमीनिर्णयः
दशमीनिर्णयः ९०
एकादशीनिर्णयः
द्वादशीनिर्णयः
चतुर्दशीतत्र व
१६पौर्णिमानिर्ण०
६६अमानिर्णयः
७३ग्रहणकालः
७७संक्रांतिनिर्ण०
८२षडशीतिमुखनि
मासनिर्णयः
८३मासद्वयं
९४ऋतुनिर्णयः
९५आयननिर्णः
९५मलमासवर्ज
९७कलिवर्ज्यानि
१०५

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

श्रीगणेशायनमः॥ भगवंतभास्करायेग्रंथोस्मिन्शिष्टसंमतेचततः॥ समयस्यविधिमयूखःप्रतन्यतेनीलकंठेन
१ तिथिर्द्वेधा॥पूर्णाखंडाच॥तत्राद्यास्कंदे॥प्रतिपत्पक्षतयःसर्वाउदयादुदयंरवेः॥संपूर्णातिथ्याताहरिवास
रवर्जिताः॥हरिवासरएकादशीतत्रवेधांतरंवक्ष्यते॥तद्भिन्नाखंडा॥तस्यावेद्यमाहपैठीनसिः॥पक्षद्वयेपितिथयस्ति
थिपूर्वंतथोत्तरा॥त्रिभिर्मुहूर्तैर्विध्यंतिसामान्योयंविधिःस्मृतइति॥अत्रपूर्वयातिथ्योदयोत्तरमुत्तरयाचोदयात्पू
र्वंत्रिमुहूर्तयावेधोवधीयते॥निबंधनांतुसर्वेषांदिनमध्यएवपूर्वोत्तरतिथ्योस्त्रिमुहूर्त्तयोःप्रवेशोवेधोभिमतःसर्वथा
होरात्रद्वयगामिनीतिथिःसंदिग्धत्वान्निर्णया॥सापिचकर्मांगतयाविहितैवनिषिद्धातथाचदृङ्मार्ग्यः॥विधिःपू
ज्यतिथौतत्रनिषेधःकालमात्रतइति॥यत्तुदक्षः॥त्रिमुहूर्त्तानकर्तव्यायातिथिःक्षयगामिनी॥द्विमुहूर्त्तापिकर्तव्या
यातिथिर्द्वेद्विगामिनीति॥अत्रापिश्राद्धस्यपूर्वेद्युरन्वयान्नेत्रिमुहूर्तेसाग्रेद्विमुहूर्तयहणेचतात्पर्यं॥अतएववृशि
वरहस्ये॥यांप्राप्यास्तमुपेत्यर्कःसाचेत्स्यात्त्रिमुहूर्त्तगा॥धर्मह्रस्वेषुसर्वेषुसंपूर्णांतांविदुर्बुधाइतिविष्णुधर्मोत्तरे॥

उदितेदैवतंपानांपत्र्यंचास्तमितेरवौ॥द्विमुहूर्तंत्रिरूक्ष्यसातिथिर्हव्यकव्ययोरिति॥द्विमुहूर्तयाह्यतोस्त्रिरनुकल्पएव॥उदि
तेसतिदैवतंपानांपत्र्यंचास्तमितेरवौ॥द्विमुहूर्तंत्रिरूक्ष्यसातिथिर्हव्यकव्ययोरिति॥द्विमुहूर्तयाह्यतोस्त्रिरनुकल्पएव॥उदि
ते

व्रतंव्रतीतिस्मृतेश्च ॥ वैषम्येणकर्मकालस्यैधिक्यात्याद्याः ॥ उभयोर्नेष्टयोः साम्येनैकदेशउभयोरित्येतेषुपक्षेषुनिर्णयो
निगमेयुग्मानियुगपत्तानांषण्मुन्योवसुरंध्रयोः ॥ रुद्रेणद्वादशीयुक्ताचतुर्दश्यर्कयाचपूर्णिमा ॥ प्रतिपद्यमावास्यातिथ्योर्युग्मं
महाफलं ॥ एतद्व्यस्तंमहादोषहंतिपुण्यंपुराकृतमिति ॥ युग्मंद्वितीया ॥ त्र्यग्निस्तृतीयायुगंचतुर्थीभूतंपंचमी ॥ षट्षष्ठी
मुनिः सप्तमी ॥ वसुरष्टमी ॥ रंध्रंनवमी ॥ रुद्रएकादशी ॥ तिथ्योर्युग्मंद्वितीयात्रितीयायुताचद्युतेति ॥ एवंचतुर्थीपंच
म्यादीनांयुग्मानि ॥ यत्तु ॥ षष्ठ्यष्टम्यप्यमावाशाकृष्णपक्षेचतुर्दशी ॥ एताःपरयुताःपूज्याःपराःपूर्वेणसंयुताइतियुग्म
वाक्यंतदप्येतत्संवाद्येच ॥ यत्तु ॥ प्रतिपत्सद्वितीयास्याद्वितीयाप्रतिपद्युतेति ॥ यच्च ॥ चतुर्थीसंयुतायाचसप्तमी
यांफलफलप्रदा ॥ चतुर्थीचतृतीयायांमहापुण्यंफलप्रदेतितदतिदुरुद्धं ॥ अनयोश्चपक्षभेदेनव्यवस्थोक्ता ॥ विष्णुधर्मो
त्तरे ॥ शुक्लपक्षेतिथिर्ग्राह्यास्यामस्युदितोरविः ॥ कृष्णपक्षेतिथिर्ग्राह्यास्यामस्तमितोरविरिति ॥ कर्मकालाव्याप्तौतु ३
उपक्रमगायोयस्यविहितःकालःकर्मणस्तदुपक्रमे ॥ विद्यमानास्तावेदंगंनोसितोपक्रमेणलिंगवचनात् ॥ तिथिरितिशेषः

अयंचयुग्मवाक्याकृतोनिर्णयोदैवएवकर्मणि ॥ पित्र्येतुपूर्वोक्तपक्षेषु ॥ खर्वेदर्पस्तथाहिंसात्रिविधंतिथिलक्षणं ॥ खर्व
दर्पोपरोपूज्योहिंसास्यात्पूर्वकालिकीति ॥ उद्वाहतत्त्वेनिर्णयः ॥ खर्वः साम्यंदर्पोवृद्धिः ॥ हिंसाक्षयः ॥ एतेच खर्वोदयः
क्वचित्पूर्वतिथ्यपेक्षायांग्राह्यंतिथिरेव ॥ क्वचिद्ग्राह्यामपेक्ष्योत्तरामितिथिरितितत्रवक्ष्यामः ॥ तथाचनिगमे ॥ द्वितीयाद्वि
कयुग्मानांपूज्यतानियमादिषु ॥ एकोद्दिष्टादिवृद्ध्यादौक्रमात्सद्वृद्ध्यादिचोदनेति ॥ अत्राद्यमादिपदंतिथ्यंतराणामु
पादानार्थंद्वितीकलेदेवकर्मणीतृतीयापार्वणस्याचतुर्थ्यर्द्धरादौयेषामित्यत्रनुणसंविज्ञानबहुविहीनासर्वदेव
श्राद्धानांमुख्यद्वृद्धिश्राद्धस्यतिथ्यप्रयुक्तलेनतान्निर्णयानुपयोगात् ॥ वृद्धिनिमित्तंस्वनिमित्तकश्राद्धंकृत्वाक्षकपं
चमंसाम्यस्य ॥ हा सद्वृद्ध्यादिचोदनास्वर्वदर्पादिवाक्यमित्यर्थः ॥ यत्तुदेवलः ॥ यांतिथिंसमनुप्राप्योदयंयातिभा
स्करः ॥ सातिथिंसकलाज्ञेयास्नानदानजपादिषु ॥ यत्तुस्कांदे ॥ यांतिथिंसमुनुप्राप्ययास्तंयातिदिनीपतिः ॥ सा
तिथिः सकलाज्ञेयादानाध्ययनकर्मसु ॥ तत्रैवोत्तरयाह्यत्वसाधकानांयुग्मस्वर्वसुकृष्णादिवचसामुपबृंहकं ॥

एतदपवादःस्कांदे ॥ मन्वादौचयुगादौचयद्ग्रहणेचंद्रसूर्ययोः ॥ व्यतीपातेवैधृतौचतत्कालव्यापिनीक्रिया ॥ अभ्यंगेचोदधिस्नानेदंतधावनमैथुने ॥ जातेचमरणेचैवतत्कालव्यापिनीतिथिरितिविरुद्धवचोव्यवस्था ॥ अर्कः सामान्यतोविभागमहाव्यासः ॥ मुहूर्तेत्रितयंप्रातस्नानदानेतुसंगमः ॥ मध्याह्नस्त्रिमुहूर्तेः स्यादपराह्णोपितादृशः ॥ सायाह्नः स्त्रिमुहूर्तेः स्यात्सर्वकर्मबहिः कृतइति ॥ पूर्वाह्नमध्याह्नापराह्नइतित्रेधाविभागस्यक्वचित् ॥ पूर्वाह्नापराह्नइतिद्वेधाइतिविभागस्यचनिर्णयादौदुपायोवक्ष्यते ॥ अथैकभक्तंदेवलः ॥ दिनार्धसमयेतीतेभुज्यतेनियमेनयत् ॥ एकभक्तमितिप्रोक्तंन्यूनंत्र्यासत्रयेणतु ॥ दिवार्धोत्तरंसामान्यतोप्युक्तः ॥ कालोमध्याह्नावोतोधिरेव ॥ मध्याह्नव्यापिनीग्राह्यैकभक्तव्रतेतिथिरितिबौधायनोक्तेः ॥ अत्रपूर्वोक्तषट्पक्षेन्तरदिनएवकर्मकालव्याप्तावधिकस्पर्शेचोत्तरान्यथापूर्वैरितिमाधवाद्याः ॥ अथनक्तंव्यासः ॥ त्रिमुहूर्तंपिदोषः स्याद्भानावस्तंगतेसति ॥ नक्तंतत्प्रकुर्वीतइतिशास्त्रस्यनिश्चयः ॥ यत्तुसायंसंध्यात्रिघटिकात्यस्ताउपरिशास्वतइतिस्कांदोक्तंसंध्यायांमार्कंडेयेनचत्वारिंशन्नक्तकर्माणिसंध्या

यांपरिवर्जयेत् ॥ आहारंमैथुनंनिद्रांस्वाध्यायंपरिवर्जयेदितिभोजनंनिषिद्धंतद्रागप्राप्तंनवैधंनक्तभोजनंविधिस्पृष्टेनिषेधानवकाशात् ॥ एतेनपूर्वोदितरात्रिभोजननिषेधोप्यत्रप्रत्यक्तः प्रदोषव्याप्यभावेस्कांदे ॥ प्रदोषव्यापिनीनस्याद्दिवानक्तंविधीयते ॥ आत्मनोद्विगुणाछायामंदीप्तवतिभास्करे ॥ तन्नक्तंनक्तमित्याहुर्नतन्निशिभोजनं ॥ एवंज्ञात्वाततोविद्वान्सायाह्नेतुभुजिक्रियां ॥ कुर्यान्नक्तंव्रतीनक्तफलंप्राप्नोतिनिश्चितं ॥ सौरनक्तेत्रिमुहूर्तस्यगेवाह्निनिशिवैतावतीतिथिः ॥ तस्यांसौरंसदैवनक्तमन्येवतुभोजनं ॥ स्मृत्यंतरेविशेषः ॥ पतिश्चयदिवाचैवकुर्यातत्सदिवाकरं ॥ सदिवाकरंतुतत्प्रोक्तंयतिमेवघटिकाद्वयमितिइतिनक्तनिर्णयः ॥ अथायाचितंनिर्णीयते ॥ तच्चयाचितभोजननिषेधरूपमयाचितंभोक्ष्यइतित्रतरूपंवा ॥ तस्यफलमुक्तं ॥ माधवीयेस्मृत्यंतरे ॥ अयाचिताशीमितंभुक्तपरांसिद्धिमवाप्नुयादिति ॥ अत्रविशेषवचनाभावादुपवासवन्निर्णयइतिकेचित् ॥ तन्न ॥ एकाभक्तयोर्यावद्दिनाद्घटिकावधिः ॥ सातिथिः सर्वदाज्ञेयानक्तंसायाह्नसंगतेति ॥ सार्वधरीयेनारदोक्तेः अथप्रसंगाद्व्रतयेकिंचिदुच्यते ॥ सत्यव्रतः ॥ उदयस्थातिथिर्यार्हिनभवेद्दिनमध्यगा ॥ पारणंतानवत्तानीस्यादारंभ

श्वसमापनमितिब्रह्मयामले॥ दिनभद्रायदारात्रौरात्रिभद्रायदादिवा॥ नत्याज्यान्युक्तकार्येषुपाकुरेवंपुरातनाः॥ व्रतखंडे॥
अग्निपुराणे॥ व्रीहिषष्टिकमुद्गाश्चकलायाःसलिलंपयः॥ श्यामाकाश्चैवनीवारागोधूमाघाव्रतेहिताः॥ कूष्मांडालांबुकंतथा
कपालकाज्योत्स्निकास्त्यजेत्॥ चरुर्भेक्ष्यंसक्तुकणाशाकंदधिघृतंमधु॥ श्यामाकाः शालिनीवाराः यावकंमूलतंडुलं॥ ह
विष्यव्रतनक्तादौत्र्यग्निकार्यादिकेहितं॥ मधुमांसंविहायान्यद्व्रतेचाहितमीरितं॥ ज्योत्स्निकाकोशातकीहितविहितंमधुम
घं॥ छंदोगपरिनिष्टे॥ हविष्येषु यवामुख्यास्तदनुव्रीहयः स्मृताः॥ मांषकोद्रव॥ गौरादीन्सर्वान्विषुवर्जयेत्॥ भविष्यो
त्तरे॥ हैमंतिकंसितास्विन्नंधान्यंमुद्गस्तिलायवाः॥ कलायकंगुनीवारावास्तूकंहिलमोचिका॥ षष्टिकाकालशाकंचमूलकं
कैमुकंतरेत्॥ केंद्रः सैंधवसामुद्रलवणेमधुसर्पिषी॥ पयोद्रुतसारंचपनसाम्रहरीतकी॥ पिप्पलीजरकंचैवनागरं
गांडूतिंतिणी॥ कदलीधवलीधात्रीफलान्यगुडमेक्षवं॥ अतैलपक्वंमुनयोहविष्याणिप्रचक्षते॥ सर्पिःपयश्चात्रगव्यं॥
अतैलपक्वमित्येततत्कथितंहविष्याणामेवविशेषणं॥ हारीतः॥ पतितपाखंडनास्तिकादिसंभाषणान्यतास्त्रीलादिकमुपवासादि

यमः

उ
जीर्ण

५

ग

वर्जनीयमिति॥ कौर्मे॥ बर्हिर्ग्रामंत्यजान्स्तिपतिंचैरजस्वलां॥ नस्त्रीन्नाप्यभाषतनेक्षेतव्रतवासरे॥ व्रतेधिकोरुमंतुः॥
विहितस्याननुष्ठानमिंद्रियाणामनियहः॥ निषिद्धसेवनंनित्यंवर्जनीयंप्रयत्नतइति॥ विष्णुधर्मोत्तरे॥ असकृज्जलपानंचदि
वास्वापंचमैथुनं॥ तांबूलचर्वणंमांसंवर्जयेद्व्रतवासरइति॥ मांसनिषेधःपारणादिने॥ पारणांव्रतंज्ञेयंइत्यत्रेः॥ नतुप्रधा
नदिनेप्रसक्त्यभावात्॥ वर्जयेत्पारणंमांसंव्रताहेष्वौषधंसदेत्यत्रि॥ औषधामपिमांसंव्रताहेवर्जयेदित्यर्थः॥ असकृ
ज्जलपानाच्चसकृत्तांबूलभक्षणात्॥ उपवासःप्रणश्येतदिवास्वापाच्चमैथुनात्॥ अन्नाक्तौतुसक्त्वाअन्यत्रेवांबुपानेच
नोपवासःप्रणश्यतीति॥ अत्ययेप्राणात्ययेय॥ वृद्धवसिष्ठ॥ उपवासेतथाश्राद्धेनकुर्याद्दंतधावनं॥ दंताकाष्ठसंयोहंतिस
प्तकुलानिचेति॥ पैठीनसिः॥ अलाभेवा निषेधेवाकाष्ठानांदंतधावनेपर्णादिनाविमृद्यनाभिद्धोल्लेखंसदैवचेति॥
व्यासः॥ अलाभेदंतकाष्ठानांनिषिद्धेयांतथातिथौ॥ अपांद्वादशगंडूषैर्विध्याद्दंतधावनं॥ विष्णुरहस्ये॥ स्मृत्वालो
कानगंधादिस्वादनंपरिकीर्तितं॥ अन्नस्यवर्जयेत्सर्वंग्रासानांचाष्टकोक्षणं॥ गात्राभ्यंगंशिरोभ्यंगंतांबूलंचानुले

पनं ॥ व्रतस्थेवर्जयेत्सर्वंयच्चान्यद्बलरागकृत् ॥ मैथुनंचाष्टांगंतथा ॥ स्मरणंकीर्तनंकेलिःप्रेक्षणंगुह्यभाषणं ॥ संकल्पोध्यवसायश्चक्रियानिवृत्तिरेवच ॥ एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणइति ॥ देवलः ॥ स्त्रीणांतुप्रेक्षणास्पर्शात्तासुसंकल्पनादपिविपद्यतेब्रह्मचर्यंनदारेष्वृतुसंगमादिति ॥ स्वदारेष्वृतुसंगमादिसपिकचित्पाठः ॥ विष्णुधर्मोत्तरे ॥ तज्जप्यजपनध्यानतत्कथाश्रवणादिकं ॥ तदर्चनंचतन्नामकीर्तनंश्रवणादयः ॥ उपवासकृतामेतेगुणाप्रोक्तामनीषिभिः ॥ तच्छब्देनोपास्यदेवताया ॥ देवलः ॥ ब्रह्मचर्यमहिंसाचसत्यमामिषवर्जनंव्रतेष्वेतानिचत्वारिकर्तव्यानिहसूरिभिः ॥ आमिषंमांसं ॥ आमिषंइतिपानीयंगोवर्जेक्षीरमामिषंमस्यरमामिषंसस्येफलेजंबीरमामिषं ॥ आमिषंशुक्तिकाचूर्णमारनालंतथामिषमिति ॥ स्मृत्यंतरेऽपिच ॥ पाद्मे ॥ अष्टौव्रतान्यवतघ्नानित्रापोमूलंफलंपयः ॥ हविर्ब्राह्मणकाम्याचगुरोर्वचनमौषधं ॥ पयःपानादीनांव्रतेघ्नंचस्त्रीबालाद्यत्यंतपीडितंव्रतविषयंसर्वेभूता यंचैवप्रसादोगुरुशासनं ॥ अव्रतघ्नानिपच्यंतेसद्भूतानिशास्त्रतः ॥ सर्वंभूतभयंसर्वेभ्योभूतेभ्यःअभयंहेमाद्रौपाद्मे ॥ गर्भिणीसूतिकादिश्चकुमारीचयै

MEMORIAL

रोगिणी ॥ यदाशुद्धःतदान्येनकारयेत्तेयेतांस्वयमिति ॥ मदनरत्नेछागलेयः ॥ पूर्ववत्तंगृहीत्वायोनाचरेत्काममोहितः जीवन्सर्वतिचंडालोमृतःश्वाचाभिजायते ॥ गरुडपुराणे ॥ क्रोधात्प्रमादाल्लोभाद्व्रतेभंगोसवेदिति ॥ दिनत्रयंनभुंजीतमुंडनंत्रिरात्रोपवासइति ॥ प्रायश्चित्तोत्तरमतिक्रांतानुष्ठानंकृत्वापुनरेवव्रतीभवेदितिवायुपुराणोक्तेः ॥ अथप्रतिपदमारभ्यक्रमेणसर्वतिथीनांनिर्णयस्तत्रलक्षेचोच्यते ॥ तत्रादौप्रतिपन्निर्णीयते ॥ तत्रप्रतिपदपराह्णव्यापिनीशुक्लपक्षेपूर्वायाह्या ॥ प्रतिपदमावास्येतियुग्मवाक्यात् ॥ मदनरत्नेस्कंदपुराणेपि ॥ प्रतिपत्संमुखीकार्यायाभवेदापराह्णिकीति ॥ दीपिकापि ॥ शुक्लस्यात्प्रतिपत्तिथिःप्रथमतश्चेत्सापराह्णेभवेदिति ॥ तदभावेत्वूर्ध्वमाधवेन ॥ तदभावेतुसायाह्नव्यापिनीपरिगृह्यतइति ॥ कृष्णपक्षेपराह्णाद्यातुर्दीपिकायां ॥ कृष्णात्तरतोविलेति ॥ अथचैत्रप्रतिपत्कृत्यंतत्रविष्णुः ॥ चैत्रमासिमहाबाहोपुण्याप्रतिपदापरं ॥ यस्तस्यांस्पृष्टास्नानंकुर्यान्नरोत्तम ॥ नतस्यदुरितंकिंचिदाधयोव्याधयोनरः ॥ तथा ॥ कृत्वाचावश्यकार्याणिसंतर्प्यपितृदेवताः ॥ वंदयेद्वालिकाधूलिंसर्वदुष्टोपशांतये ॥ मंत्रः ॥

वंदितासिसुरेंद्रेणवंदितात्रांकरेणच॥अतस्त्वंपाहिनोदेविविभूतेभूतिदाभवेति॥पुराणसमुच्चये॥दत्तेतुषारसमयेसि
तपंचदश्यांप्रातर्वसंतसमयेसमुपस्थितेत्र॥संपाश्यचूतकुसमंसचंदनेनसत्यंहिपार्थपुरुषोघसमांसुखीस्यात्॥पंचद
श्यामतीतायांप्रातरित्यर्थः॥येपिबंतिवसंताद्येचूतपुष्पंसचंदनं॥सत्यंहत्यस्थकामस्यपूजनंक्रियतेनरैरिति॥भविष्योत्त
रात्॥वसंताद्यैप्रतिपदमंत्रः॥चूतमंजर्यवसंतस्थेमाकंदेकुसुमंतव॥सचंदनंपिबामद्यसर्वकामार्थसिद्धये॥भविष्ये॥ततःप्रातर्द्वि
तीयायांपुत्रमित्रादिसंयुतः॥नृपतिर्विततेक्षोवितानवरशोभिते॥उपविश्यासनेरम्येपौरजानपदैःसह॥सिंदूरंकुंकुमक्षोदंपट
वासैःसचंदनैः॥विकीर्यलोकास्तांबूलैःसमान्यंचेष्टथकृष्टथक्॥नृत्यगीतविनोदैश्चकुर्यात्कामममहोत्सवं॥एवंकुर्वन्नवाप्नोति
यावत्संवत्सरंसुखमिति॥इदंपूर्वविद्धायामेव॥वत्सरादौवसंतादौबलिराज्यंतथैवच॥पूर्वविद्धैवकर्तव्याप्रतिपत्सर्वराजु
धैरितिवृद्धवसिष्ठवाक्यात्॥चैत्रेसुकृष्णप्रतिपदुत्सरारंभेउदयव्यापिनीग्राह्या॥तदुक्तंमाधवीयेब्राह्मे॥चैत्रमासिजगद्ब्रह्मा
ससर्जप्रथमेहनि॥शुक्लपक्षेसमग्रंतुतदासूर्योदयेसतीति॥दिनद्वयेउदयव्याप्तावव्याप्तौवापूर्वैव॥पूर्वोक्तवृद्धवसिष्ठवा

क्यात्॥तत्रतैलाभ्यंगउक्तस्तेनैव॥वत्सरादौवसंतादौबलिराज्येतथैवच॥तैलाभ्यंगमकुर्वाणोरौरवंनरकंव्रजेत्॥इति॥अ
त्रशाकादिश्रवणमुक्तंज्योतिःशास्त्रे॥शाकवत्सरभूपमंत्रिणांरसधान्येश्वरमेघपतीनां॥श्रवणात्पठनाच्चैवनृणांसुखंतां
यास्यसुसंसदाश्रियेति॥चैत्रमलमासेतैलाभ्यंगशाकश्रवणादिषुद्वयमेवकार्यं॥यद्यपिवत्सरवसंतयोःप्रवृत्तिर्जातातथा
पिषष्यांतुदिवसेमासःकथितोबादरायणिः॥पूर्वमर्धंपरित्यज्यकर्तव्योचोत्तरेक्रियेतिवचनेनपूर्वमासस्थकृत्यस्योत्तरमा
सेकर्तव्यत्वविधात्॥नवरात्रिनवम्यादिवत्॥तथात्रविशेषाभविष्ये॥अतीतेफाल्गुनेमासिपौर्णमास्यांचैत्रमहोत्सवे॥पुण्ये
ऽहिविप्रकथितंपापघ्नंसमारभेति॥ततश्चोत्सृजतेविद्वान्मंत्रेणानेनमानवः॥प्रपेयंसर्वसामान्याद्भूतेभ्यःप्रतिपादिता
अस्याःप्रदानात्पितरस्तृप्यंतुहिपितामहाः॥अनिर्वार्यंततोदेयंजलंमासचतुष्टयं॥प्रपांदातुमशक्तेनविशेषाद्धर्ममी
प्सुना॥प्रसह्यंधर्मघटकोवस्त्रसंवेष्टिताननः॥ब्राह्मणस्यगृहेदेयाच्छीतामलजलःशुचिः॥एषधर्मघटोदत्तोब्रह्मविष्णु
शिवात्मकः॥अस्यप्रदानात्सकलान्ममसंतुमनोरथाः॥अनेनविधिनायस्तुधर्मकुंभंप्रयच्छति॥प्रपादानफलंसोपिप्राप्ना

तीहनसंशयः॥ इतिज्येष्ठप्रतिपदिदारुहारंभः॥ कार्त्तीरवेः॥ ज्येष्ठेमासितपक्षेप्राप्यप्रतिपदांतिथिं॥ दत्त्वाघमेधि
कस्नात्वामुच्यतेसर्वपातकैः॥ एवंसर्वासुतिथिषुक्रमस्नायीनरोत्तमः॥ आश्वयुक्पक्षदशमीप्रतिजन्माघमुत्सृजेत्॥
आश्विनशुक्लप्रतिपदिनवरात्रारंभः॥ तदुक्तंहेमाद्रौधौम्येन॥ आश्विनेमासिशुक्लेतुकर्तव्यंनवरात्रिकं॥ प्रतिपदादिक्रमे
नैवयावन्नवमीभवेत्॥ तत्रपूर्वाह्णव्यापिनीग्राह्या॥ आश्विनस्यसितेपक्षेनवरात्रिमुपोषितः॥ सुस्नातास्तिलतैलेन
पूर्वाह्णेपूजयेच्छिवमिति॥ देवीपुराणेतस्यकर्मकालेनोक्तेः॥ कर्मणोयस्ययः कालस्तत्कालव्यापिनीतिथिरित्यनेनकर्म
कालव्यापिन्यामेवकर्तव्योक्तेः॥ नचोपवासानुरोधेननिर्णयःउक्तस्यनवरात्रिमुपोषितःपूजयेदित्यादिदेवीपुराणादौ
नखानिनिर्क्षंतनस्नातीत्यादिवत्फलसंस्कारत्वेनपूजांगत्वाधगमात्॥ अतःप्रधानभूतपूजाकालपूर्वाह्णव्यापित्वेनैवनिर्ण
यः॥ पूजायास्तुप्रधान्यंफलसंबंधात्॥ सचस्कांदे॥ आश्विनेमासिमघांतेमहिषासुरमर्दिनी॥ देवीसंपूजयित्वातु
अर्धरात्रेष्टमीषुच॥ क्रीडंतिविविधैर्भोगैर्देवलोकेसुदुर्लभे॥ नाधयोव्याधयस्तेषांनचशत्रुभयंभवेदिति॥ यत्तुगोवि

दार्णवे॥ देवीपुराणे॥ दारुकोलभरुपूजाक्रियतेयाचवार्षिकी॥ साकार्योदयगामिन्यांजातिथेस्तत्रयुग्मेतिति॥ तत्रोदयगा
मित्वमप्रिप्रायपूर्वाह्णव्यापित्वएवमवेतियुग्मतायुग्मवाक्यानुरोधेननिर्णयइत्यर्थः॥ वार्षिकित्यनेनसंवत्सरस्यादौशु
क्लप्रतिपद्युपक्रम्यनवम्यंतापूजाभिधीयते॥ ततश्चदारुसंतयोस्थूल्यएवदुर्गोत्सवः कार्यः॥ यानितु॥ योमांपूजयते
नित्यंद्वितीयादिगुणान्वितां॥ प्रतिपत्तारदेज्ञात्वासोश्नुतेसुखमव्ययं॥ यदिकुर्यादमायुक्तांप्रतिष्ठापनंमम॥ तस्यशा
पायुतंदत्त्वाभस्मशेषकरोम्यहं॥ त्र्यग्राल्लुप्ततेयस्तुकलशस्थापनंमम॥ तस्यसंपदिनाशःस्याज्ज्येष्ठंपुत्रोविनश्यति॥
तथा॥ नदर्शकलमायुक्तांप्रतिपच्चंडिकार्चने॥ उदयेद्विमुहूर्त्तापिग्राह्यासोदयगामिनि॥ याचाश्वयुजिमासेस्यात्व
तिपद्भूयान्विता॥ शुद्धेमार्चनंनस्यान्नातयज्ञफलप्रदमितित्रयोयोगानिषेधकानि॥ यानिचद्वितीयाशेषसंयु
क्तांप्रतिपच्चंडिकार्चने॥ मैहोदयोपदेशोयंहृतंपुत्रविनाशकं॥ त्र्यंशेनवरात्रस्यद्वितीयात्तुरीसंयुता॥ नकेवलंविधि
र्हंतिविधात्सापुत्रसंपदमित्यादिनिद्वितीयायोगानिषेधकानि तान्युभयविद्वान्यपिसर्वाणिमूलानि॥ समूलत्वेपिप

स· म· रस्यरंसत्वंति पक्षिलादिनिर्णयकानि॥ चंद्रप्रकाशे॥ प्रातरावाह्ययेद्देवीं प्रातरेवप्रपूजयेत्॥ प्रातःप्रातश्चसंपूज्य
प्रातरेवविसर्जयेदिति॥ सतिसंभवेप्रतिपदश्चार्घनाडीषोडशकंयत्कालकलशंस्थापयेत्॥ आद्यायःषोडशानाञ्च
स्थूलश्चायःकुरुतेनरः॥ कलशस्थापनंतत्रयदिष्टंजायतेध्रुवमितिदेवीपुराणवचनात्॥ कलशस्थापनेवैधतिचि
त्रादियोगनिषेधकानिवचनानितानिनिर्मूलानि॥ यथाभद्रयुताचेत्यतिथ्यतुलभ्येतविरूपयोगैरपिसंगतासति॥ सै
वापराह्णेविबुधैर्विद्ध्यात्त्रिपुत्रराज्यादिविवृद्धिहेतुरिति॥ कलशस्थापनंतुदिवैवकार्यंनरात्रौ॥ तदुक्तंमात्स्ये॥ नरात्रौ
स्थापनंकार्यंनचकुंभाभिषेचनमिति॥ अत्रत्रिरात्रमप्युक्तं॥ हेमाद्रौधौम्येन॥ त्रिरात्रंवापिकर्तव्यंसप्तम्यादियथा
क्रममिति॥ अथविस्तरेणनवरात्रिकृत्यंदेवीपुराणे॥ कन्यासंस्थेरवौशुक्लप्रतिपत्सुसमारभ्यनंदिकां॥ त्रयाचित्वथ
चेकाशिनंकाशिवाथपदः॥ प्रातःस्नायीजितक्रोधस्त्रिकालंशिवपूजकः॥ जपेद्धोमसमायुक्तः कन्यकांस्तोषयेन्मुदा
॥ शिवश्चशिवाचशिवौतयोःपूजकः॥ नंदाचप्रतिपदेव॥ प्रथमोपस्थितत्वात्॥ तस्याप्रतिपदिपूर्वोक्तैतिलतैलेन

स्नातोयजमानोगणपतिंसंपूज्यदेवःकलशंनिर्दिश्यनवमीपर्यंतमुपवास्यनिरंतरंनियमोपेतेनुगोपूजनममुकफ
लकामःकरिष्यइतिसंकल्पयेत्॥ ततःकदलीस्तंभवस्त्रादिमंडितेगृहेचतुरस्रचतुर्द्वारवेदिकोपरिसर्वतोभद्रादिमंड
लंविधायमहीद्यौरित्यादिवरुणपूजांतंकलशंस्थापयेत्॥ सौवर्णादिप्रतिमापूजार्थंपूज्यामंडलकुंभस्थेतिदेवीपु
राणात्मन्मथ्यादिकंतुलग्नास्यपश्चादासनेस्थाप्यवेदिकोणेषपिच्चतुरःकलशान्स्थाप्यः॥ चतुरःकलशानयस्तु
दद्याद्देवगृहेनरः॥ चतुःसमुद्रवलयांसतुभुंक्तेवसुंधरांमितिविष्णुधर्मोत्तरात्॥ प्रतिमाचहेमादिमयीदेवीपुराणे॥ हेम
रजतमृत्तुरीलचित्रार्पितापिवा॥ खड्गेशृंगेर्चितोदेविसर्वकर्मफलप्रदा॥ मृन्मयींप्रतिमांहृल्लाबिल्वेवायस्तुपूज
येत्॥ आत्मवित्तानुसारेणसलक्षेनौलिकंफलमिति॥ प्रतिमालक्षणंमात्स्यपुराणे॥ जटाजुटसमायुक्तामर्द्धेंदुकृत
तलोचनां॥ लोचनत्रयसंयुक्तांपद्मेंदुसदृशाननां॥ अतसीपुष्पवर्णाभांसुप्रतिष्ठांसुलोचनां॥ नवयौवनसंपन्नां स
र्वाभरणभूषितां॥ सुचारुदशनांतद्वत्पीनोन्नतपयोधरां॥ स्त्रीप्रसंगस्थानसंस्थानांमहिषासुरमर्दिनीं॥ त्रिशूलंदक्षिणे

क्षीपिकाघा

कां

ऊर्ध्वरां

दद्यात्खड्गं चक्रं क्रमादयः॥तीक्ष्णंबाणंतथाशक्तिंवामतोपिविचिंतयेत्॥खेटकंपूर्णचापंचपाशमंकुशमेवच॥घंटावापर
सुंवापिमेवोतःसंन्निवेशयेत्॥आघस्तान्महिषंस्तावद्विरस्कंप्रदापितं॥शिरश्छेदोद्भवंतद्वदानवंखड्गपाणिनं॥हृदि
शूलेननिर्भिन्नंतीर्यंत्रविघूर्णितं॥रक्तरक्तीकृतांगंचरक्तविस्फारितेक्षणं॥वेष्टितंनागपाशेनभृकुटीकुटिलाननं॥स
पाशवामहस्तेनधृतकेशंचदुर्गया॥वमद्रुधिरवक्त्रंचदेव्याःसिंहंप्रदर्शयेत्॥देव्यास्तुदक्षिणंपार्श्वंसमंसिंहोपरिस्थितं॥कि
ञ्चिदूर्ध्वंतथावाममंगुष्ठंमहिषोपरि॥स्तूयमानंचतद्रूपामरैःसंनिवेशयेदितिध्यानमद्येवं॥एहिदुर्गेमहाभागरक्षार्थं
ममसर्वदा॥आवाहयामिदंदेवि सर्वकामार्थसिद्धये॥अस्यांमूर्तौसमागच्छस्थितिंकृपयाकुरु॥रक्षांकुरुमहाभद्रे
विश्वेश्वरिनमोस्तुते॥इत्यावाहनं॥भगवतिदुर्गेइहागच्छइहतिष्ठइहसंनिधेहिस्थिराभव॥सुप्रसन्नाभवइत्यपिपठं
ति॥पूजामंत्रास्त्र॥कुर्याद्देव्यास्त्रमंत्रेणइत्यभिधाय॥जयंतिमंगलाकालिभद्रकाल्यैकपालिनी॥दुर्गाक्षमाशिवाधा
त्रिस्वाहास्वधानमोस्तुते॥अनेनैवतुमंत्रेणजपहोमादिकारयेत्॥इतिदेविपुराणेउक्तं॥तल्लिंगैःपूजयेन्मंत्रैःसर्वदेवा

वस्त्रा

१०

सर्वत्रदेवान्समाहितइति अग्निपुराणाद्वैदिकत्रागमकोवा॥नाम्नासर्वंसमापयेदितिसाधारणवाक्यात्॥प्रणवादिचतुर्थ्यं
तनमोंतैर्नाममंत्रैर्वा॥स्कंदेतु॥दुर्गेमेदुस्तरंकार्यंभवदुःखविनाशिनींपूजयामिसदाभक्त्यादुर्गांदुर्गार्तिनाशिनीं॥अ
नेनैवतुमंत्रेणजपहोमादिकारयेदितिकृत्यं॥छत्रचामरादीनिराजोपचारैःपूजा॥तदंतेप्रणम्यदेवीं प्रार्थयेदनेनमंत्रेण॥
मंत्रार्थंमहामायेचामुंडेमुंडमालिनि॥देव्यमारोग्यविजयंदेहिदेविनमःसदा॥भूतप्रेतपिशाचेभ्योरक्षोभ्यश्चमहे
श्वरि॥देवेभ्योमानुषेभ्यश्चभयेभ्योरक्षमांसदा॥सर्वमंगलमंगल्येशिवेसर्वार्थसाधिके॥शरण्येत्र्यंबकेगौरीनारा
यणिनमोस्तुते॥रूपंदेहियशोदेहिभगंभगवतिदेहिमे॥ततोदुर्गामंत्रंवैदिकमागमिकंवाजपेत्॥दुर्गायतोजपेन्मंत्र
मेकचित्तःसमाहितेइतिदेवीपुराणात्॥पुत्रान्देहिधनंदेहिसर्वान्कामान्प्रदेहिमे॥यद्वा॥महात्म्यंभगवत्यास्तुपुरा
णादिषुकीर्तितं॥पठेच्चश्रृण्याद्वापिसर्वकामसमृद्धये॥तथा॥एकोनत्रयसिद्ध्यर्थंनवमीयावदेवहि॥चंडीपाठंजपे
च्चैवजापैतद्विधानतः॥वाराहीतंत्रे॥संकल्पितस्तोत्रपाठसंख्यांकृत्वापठेत्तुयोधीमान्॥तत्रैवच॥चंडीपाठफलंदे

हिष्टणुघ्रगदितोमम एकावृत्यादिपाठानांयथावत्कथयामिते संकल्पपूर्वंसंपूज्यसर्वांगेषुमनून्सकृत्॥पाठाद्बलिप्र
दानाच्च सिद्धिमाप्नोतिमानवः॥उपसर्गोपशांत्यर्थंत्रिरावृत्तिंपठेन्नरः॥यहोपशांतौकर्तव्यंपंचावृत्तिंवरानने॥महाभयेसमु
त्पन्नेसप्तावृत्तिंसमुन्नयेत् नवावृत्याऽखिलेच्छांतिर्वाजपेयफलंलभेत्॥राजभयायभूत्येचरुद्रावृत्तिमुदीरयेत्॥अर्कावृत्तेका
म्यसिद्धिर्वैरहानिश्चजायते॥मन्वावृत्यादिपुर्वंन्यस्तथास्त्रीवश्यतामियात्॥सौख्यंपंचदशावृत्याद्विगुणमाप्नोतिमान
वः॥फलावृत्यापुत्रपौत्रधनधान्यागमंविदुः॥राज्ञांभीतिविमोक्षायवैरस्योच्चाटनायच॥कुर्यात्सप्तदशावृत्तिंतथाष्ट
दशकंपिये॥महारिष्टविमोक्षायविंशावृत्तिंपठेत्सुधीः॥पंचविंशावर्तनात्तु भवेद्बंधविमोक्षणं॥संकटेसमनुप्राप्तेदुश्चि
कित्स्यान्मयेतथा॥ज्ञातिध्वंसेकुलोच्छेदेत्रायुषोनाशंकेतथा॥वैरिहट्टेव्यादिदुर्योधनेनात्रोतथाक्षये॥तथैवत्रिविधो
त्पातेतथाचैवनिपातके॥कुर्याद्येकाळतावृत्तिंततः संपद्यतेशुभं॥श्रियेवृद्धिःशतावृत्याराज्यवृद्धिस्तथापरा॥मनसा
चिंतितंदेवि सिध्येदष्टोत्तराळतात्॥शताश्चमेधयज्ञानांफलमाप्नोतिसुव्रते॥सहस्रावर्तनल्लक्ष्मीरावृणोतिस्वयंस्थिरा

सुकामनोरथान्कामान्नरोमोक्षमवाप्नुयात्॥यथाश्वमेधः क्रतुनांदेवानांचयथाहरिः॥स्तवानामपिसर्वेषांतथासप्तशती
स्तवः॥अथवाकुंबेनोक्तेन किमेतेनवरानने॥राज्यंश्रीश्चावृत्तिपाठात्सर्वाःसिध्यंतिसिद्धयइति॥पाठश्चनारायणादीन्न
मस्कृत्यकार्यः॥नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवीसरस्वतींचैवततोजयमुदीरयेदितिवचनात्॥जयशब्दार्थश्च
भविष्यपुराणे॥अष्टादशपुराणानिरामस्यचरितंतथा॥विष्णुधर्मादिशास्त्राणिशिवधर्माश्चभारत॥काण्व्यंचपंच
मोवेदोयन्महाभारतंस्मृतं॥द्यौश्चधर्मराजेंद्रमानवोक्तामहीपते॥जयेतिनामैतेषांपरिवदंतिमनीषिणइति॥पाठःप्रकारश्च
मात्स्ये॥प्रणवंचादितोजप्त्वास्तोत्रंवासंहितांपठेत्॥अंतेचप्रणवंदद्यादन्यथासिफलंभवेत्॥सुदृढेनान्यचित्तेनपठितव्यं
प्रयत्नतः॥नकार्यासक्तमनसाकार्यस्तोत्रस्यवाचनं॥आधोरस्थापयित्वातुपुस्तकंप्रजपेत्सुधीः॥हस्तसंस्थापनंदेवयस्मा
दन्यफलंलभेत्॥स्वयंचलितंयस्तु हस्तेनालिखितंचयत्॥अब्राह्मणेनालिखितंतच्चापिविफलंलभेत्॥ऋषिछंद
दैवन्यस्यपठेत्स्तोत्रंविचक्षणः॥संकल्पितेस्तोत्रपाठेसंख्याकृत्वापठेत्सुधीः॥अध्यायंवाप्यविरमेन्नतुमध्येकदाचन॥

कृतेविरामेमध्येतुत्रध्यायादिपठेत्पुनरिति॥श्रवणंचब्राह्मणोदेवकार्य्ये॥ब्राह्मणंवाचकंविधानान्यवर्णजमादरात्॥शुद्धान्यवर्णजाद्राजन्याचवान्नरकंव्रजेदितिभविष्यपुराणात्॥यद्यपिदेवीपुराणेजपेपूजाहोमोपिप्रत्येकमुक्तस्तथापित्रयाणांनवम्यांमेवकार्य्यं॥ब्रह्मपुराणे॥तत्राष्टम्यांसप्तकालिसुपक्वमद्यैमैब्राह्मणतर्पणैरित्यष्टमीकृत्यमध्येपाठात्॥नवम्यांबलिदानंचकर्तव्यंचयथाविधि॥जपहोमंचविधिवत्कुर्यात्तत्रविभूत्यपेक्षेतिकालिकापुराणाच्चशिष्टाचाराच्च॥बलिदानमप्यष्टमीनवम्योरेव॥पुनःपूज्यंतथाष्टम्यांविप्रोषणसमाचरेत्॥जागरंचस्वयंकुर्याद्बलिदानंतथानिशि॥प्रभूतबलिदानंचनवम्यांविधिवच्चरेदितिकालिकापुराणात्॥अत्रयद्यपिशिष्टपरिगृहीतकालिकापुराणादिष्वमद्यस्वगात्ररुधिरपशुघातादिकमुक्तंतथापिब्राह्मणस्यनभवति॥मद्यंदत्वाब्राह्मणस्तुब्राह्मण्योदेवहीयते स्वगात्रंरुधिरंदत्वाब्रह्महत्यामवाप्नुयादिति॥कालिकापुराणेनिषिद्धत्वात्॥सासालिकिजपहोमाद्यैर्नैवेद्यैश्चनिरामिषैरिति एषप्रकारःसालिकपूजायांभगवद्गीतादिषुब्राह्मणाधिकारिकातायाएवोक्तः॥पशुबलिदानस्तुविजयार्थंनृपोत्तमदशमीराजपुरस्कारेण

MEMORIAL

ब्राह्मणेन

वविधितात्वाच्च॥अतोमाषभक्तादिनानेनबलिदानंकार्य्यंमाषकुलमाषमांसाद्यैर्दद्याद्दिक्षुबलिर्निशि॥कूष्मांडमिक्षुदंडश्चमद्यंमांसंवयवच॥एतेबलिसमाख्येयास्तच्छागसमामताइतिकालिकापुराणात्॥अथकुमारीपूजा॥देवीपुराणेब्रह्मोवाचतथातुष्यतेशक्रस्तेमदाननपादिना॥कुमारीपूजनेनात्रयथोदेविप्रसीदति॥अत्रनवरात्रे॥शुक्लाष्टमीचतुर्दश्योर्नवम्याचविशेषतइतिप्रसंगादन्यत्रापिदेहिधानंकुमारीपूजनेविशेषोमदनरत्नेस्कांदे॥एकैकांपूजयेत्कन्यामेकवृद्ध्यात्तथैवच॥द्विगुणांत्रिगुणांवापिप्रत्येकंनवकंतथा॥एकवर्षांतुयाकन्यापूजार्थेतांविवर्जयेत्॥गंधपुष्पफलादीनांप्रीतिस्तत्रसमानविद्यते॥द्विवर्षकन्यामारभ्यदशवर्षावधिक्रमात्॥यथोक्तकालभेदेतुदेवीपुराणे॥विवाहानंतरंकन्यांकन्यात्वमुपजायते॥तावत्संपूज्यतेकन्यायावत्पुष्पंनदृश्यतेइति॥पूजायंत्रंतुस्कांदे॥मंत्राक्षरमयींलक्ष्मींमातृणांरूपधारिणीं॥नवदुर्गात्मिकांसाक्षात्कन्यामावाहयाम्यहं॥जगत्पूज्येजगद्वंद्यसर्वशक्तिस्वरूपिणि॥पूजांगृहाणकौमारिजगन्मातर्नमोस्तुते॥एवमभ्यर्चनंकुर्याल्कुमारीणांप्रयत्नतः॥कंचुकैश्चैववस्त्रैश्चगंधपुष्पाक्षतादिभिः॥नानाविधैर्भ

ष्यसाज्येर्सोजयेत्पायसादिभिः॥ यत्रापूजकन्यास्वरूपमुक्तंतत्रैव॥हीनाधिकांगीकुष्ठीचपिनाशिकुलसंभवां॥यंपितं
त्रीर्णांगिरंकृपूपव्रणांकितां। जात्यंधांकेकरांकाणांकुरूपांतनुरोमशां॥संत्यजेद्रोगिणींकन्यांदासीगर्भसमुद्भवामि
ति। विनाशिसंततिम्न्यांग्रंथयःकूर्परजान्वाद्याः॥ तनुश्वासौरोमशेतिकर्मधारय॥देवीपुराणेऽहोरात्रंप्रज्वाल्य
मत्स्यपुराणे। गीतवादित्रनिर्घोषंदेवस्यायतुकारयेत् घंटाभेवदशकस्यसर्ववाद्यमथीयतइति॥पूजाचप्रसस्तत्रिकालंकार्या
त्रिकालंशिवपूजइतिपूर्वोक्तदेवीपुराणात्॥ज्योतिःशास्त्रेसप्तम्यांबिल्वशाखापूजोक्ता॥आश्विनस्यसितेपक्षेसुमुख
तेनवसप्तमी। तस्यांचपत्रिकापूजाकर्त्तव्यानवनायके॥ वदास्तांसफलंबिल्वशाखामाहात्म्यपूजयेदिति॥अथैबोध
नप्रकारस्तत्कालस्तुलिंगपुराणे। कन्यायांशुक्लपक्षेचपूजयित्वाऽथदिवा॥नवम्यांबोधयेद्देवींमहाविभवविस्तरैः॥
विल्वे षष्ठ्यांबिल्वतरावधिसायंसंध्यासुकारयेत्। देवीपुराणे॥ज्येष्ठानक्षत्रयुक्तायांषष्ठ्यांबिल्वाग्रिमंत्रणं॥बिल्व
वृक्षायनमइतिबिल्वतरुंसंपूज्यबिल्वबोधंसायंसंध्यासुवृक्षेजयंतीत्यादिदुर्गेहरागछेत्यादिनादुर्गामावाह्यपूजयि

तत्फलानि॰

लागीतवाद्यघोषपुरःसरंदेवींविबोधयेत्। मंत्रस्तु॥ रावणस्यवधार्थायरामस्यानुग्रहायच॥आकाशब्रह्मणाबोधोदेव्या
स्त्वयिकृतापुरा॥इषेमासिसितेपक्षेनवम्यांमार्गयोगतः॥श्रीवृक्षेबोधयामित्वांयावत्पूजांकरोम्यहं॥षष्ठ्यां मूलर्ष
त्यादिस्थाने॥अरुमप्याश्विषष्ठ्यांसायाद्बोधयाम्यतइति॥ततोबिल्वांतरेरामंमंत्रेण॥मंत्रस्तु॥मेरुमंदरकैलास
हिमवच्छिखरेगिरौ॥जातश्रीफलवृक्षस्त्वंबिल्वकायाःसदाप्रियः॥श्रीवृक्षोलक्ष्मिशिखरेजातः श्रीफलःश्रीनिकेतनः नेतव्यो
ऽस्मियागार्थंपूज्योदुर्गास्वरूपतइति॥ जपेद्यः पुनरप्येनंपूज्यचैतांजलिःप्रसाद्येत्॥ बिल्वचक्षेमहाभागसर्वदेवांकर
प्रिय॥गृहीत्वातवशाखांतुदुर्गापूजांकरोम्यहं॥शाखाघेरोक्षवंदुःखंनवैकार्यंतयाप्रभोइति॥ततःफलयुतांमपरा
जितादिगतांमंत्रेणशाखांछेदयेद्धातस्यैतेनमंत्रेण॥ क्वचित्तुधिंधिफट्दुंफट्स्वाहेतिमंत्रः॥ततशाखांगृहेआनी
यबिल्वशाखायेनमइतिपूजयित्वाबिल्वशाखायांमन्मयप्रतिमायांचदेवीमावाहनपुनपुरःसरंपूजयित्वामा
षभक्तंक्षिबलिंचदत्वादोलादिनाबिल्वशाखांचप्रतिमांचपूजागृहेद्वारदेशेस्थापयित्वामाषभक्तंक्षिबलिंच

दापितः

दत्वापूजाग्रहस्थानिभूतानिभूतप्योनमइतिगंधादिभिःसंपूज्याभूताःप्रेताःपिशाचाश्चयेवसंत्यत्रभूतले॥तेगृह्णंतुमया
दत्तांबलिंरक्षःप्रसाधिकरतः॥पूजितागंधपुष्पाद्यैर्विलिप्तास्तेपितास्तथा॥दशादस्मादिनैःसत्यपूजांपश्यंतुमत्कृतां॥भू
तेभ्यएषमाषभक्तबलिंनमइतिबलिंदत्वा॥अपसर्पंतुयेभूतायेक्रूरा भूविसंस्थिताः॥भूतानामविरोधेनपूजाकर्मक
रोम्यहं॥क्षितितान्यैसारयेत्॥ स्थितेभूतत्रभूतेषुनैवेद्यमंडलंतथा॥विलुंपंतिमहालुब्धानत्रगृह्णंतिदेवताः॥तस्मा
द्यत्नेनकर्तव्यंभूतानामपसारणमिति॥कालिकापुराणात्॥सर्षपांधीश्वाविकिरेत्॥ततःपुनःशाखायांप्रतिमायांचदे
विसंपूज्यगीतवाद्यादिपुरःसरंपूज्यांगरूपवेश्यारोपितासिंदुर्गेत्वंभद्रदेणमयश्रीफलेपिच॥स्थिरानीतांतंत्वभूत्वामेगृहे
लंकोदाभवेतिपूजाग्रेस्थापयेत्॥ततःप्राणप्रतिष्ठांकृत्वा॥आवाहयाम्यहंदेविभद्रेणमयेश्रीफलेतथा॥कैलासशिख
रेदेवीविंध्यघ्रेहिमपर्वतात्॥आगत्यबिल्वशाखायांचंडिकेकुरुसंनिधिं॥भगवतिदुर्गेइहागछत्कभयेरावाद्यस्था
पितामिमयादेविश्रीफलेभद्रणमयेपिच॥आयुरारोग्यमैश्वर्यंदेहिदेविनमोस्तुते॥भगवतिदुर्गेइहतिष्ठतिस्थापयित्वा

दुर्गेदुर्गेसनूपासिसुरेतजेमहाबले॥सदानंदकरेदेविप्रसीदममसिद्धये॥एह्येहिभगवत्यंबशत्रुक्षयजयप्रदे॥भक्तिंत
पूजयामित्वांदुर्गेदेविसुरार्चिते॥पद्मैर्बिल्वैश्चफलोपेतैःपुष्पैश्चसुमनोहरैः॥पंचभिर्वैसंस्थितेदेविपूजयेत्वांप्रसीदमे॥दु
र्गेदेविइहागछसांनिध्यमिहकल्पय॥यज्ञभागान्गृहाणत्वंयोगिनीकोटिभिःसेहतिकृतांजलिःपठेत्॥ततोजयं
तीत्यादिदुर्गायैनमः॥इदंपाद्यंपुष्पगंधाक्षतकुंकुमदधिदूर्वाकुशातिलबिल्वपत्रसहितजलेनार्घ्यमाचमनीयपंचा
मृतस्नानीयवस्त्रपुनराचमनीयानुलेपनादिदत्वा॥ॐदुर्गायैनमइतिपुष्पांजलित्रयंदद्यात्॥ततःश्रमतोभवंश्री
वृक्षंत्रांकुरस्यसदाप्रियं॥बिल्वपत्रंप्रयछामिपवित्रंतेसुरेश्वरि॥इतिबिल्वपत्रं॥ब्रह्मविष्णुशिवादीनाद्रोणपुष्पं
सदाप्रियं॥तत्तेदुर्गेप्रयछामिसर्वकामार्थसिद्धये॥इतिद्रोणपुष्पंचनिवेद्य॥जयंतीयादिनापुष्पधूपदीपनैवेद्यपु
नराचमनीयतांबूलानिदत्वापूजासाकुण्यार्थंदक्षिणांदत्वास्तुतिंपित्वाप्रणम्यबद्धांजलिःप्रार्थयेत्॥महिषघ्निमहि
षायेचामुंडेमुंडमालिनि॥देह्यारोग्यमैश्वर्यंदेहिदेविनमोस्तुते॥कुंकुमेनसमालभ्यचंदनेनविलेपिते॥बिल्वपत्रकृता

पीडादुर्गहरारणंगतः॥ सर्वमंगलेति रूपंदेहितिचत्रिलोकंपठेत्॥ बलिंचदद्यात्॥ एवमेवमहाष्टम्यामपिपूजनं॥ विशेषतस्त्वर्ध
रात्रेजागरणंच॥ राजातुविजयाकामोर्धरात्रेविघ्नोषपूजापूर्वकंबलिंदद्यात्॥ तदर्धयामिनीशेषेविजयार्थेनृपोत्तमः॥ पंचाङ्ग
लक्षणोपेतंगंधधूपस्रगर्चितं॥ विधिवत्कालकालीतिजपत्वाखड्गेनघातयेदिति॥ देवीपुराणात्॥ पंचाशद्महिषमजंवा॥ त
त्रैवशस्त्रादिपूजनेचकुर्यात्॥ महानवम्यामेवपूजाबलिदानंहोमश्च॥ होममंत्रश्चजयंतीत्यादि॥ अनेनैवतुमंत्रेणजप
होमादिकारयेदितिदेवीपुराणात्॥ इत्यंचतत्रैवोक्तंपूजयेत्तिलहोमैश्चदधिक्षीरघृतोक्षितैरिति॥ केचित्तुपठंतिश्लोकंच
जुहुयात्पायसंतिलसर्पिषेतिरुद्रयंथवचनात्॥ सप्तशतीस्तवेनत्रितयंश्लोकंतिलसर्पिश्चपायसेनहोमंकुर्वंति राज्ञा
लश्चपीडान्तेतयेब्रह्मपुराणोक्तरंवंतपूजापिकार्या॥ सचवज्ररूपायामुषायांसूर्योदयेनोवाजिगणाधिपतिः॥ पूजामं
त्रः॥ तालिहोत्रेनमोदेवाधिदेवायतुरंगवेलचारिणे॥ सूर्यपुत्रायदेवायतुरंगमहितायच॥ तुरंगपरिषद्यस्यभटगंजो
परिधावति॥ साश्वमश्वाधिपरक्षरक्षणंत्वावजाम्यहं॥ मंत्रेणानेनरेवंतंपाद्यादैरर्चयेत्सुधीः॥ दद्याम्यांप्रातःपूजांवि

सर्जयेत्॥ संपूज्यप्रेषणंकुर्यादश्म्यांशारवोत्सवेरितिभविष्यपुराणात्॥ ततःसंप्रेषितांदेवींदशम्यांशारवोत्सवे
रितिकालिकापुराणात्॥ एवंपूजांविधायप्रणम्यदुर्गेदुर्गेरक्षणीतिकरिब्रह्माणीब्रह्मजःप्रियेति॥ सर्वलोकप्रजात्रेचप्रणमा
मिसदात्विवां॥ मंगलंशोभनंसुखंनिष्कलंपरमंफलं॥ विश्वेश्वरींविश्वमातांचंडिकांप्रणमाम्यहं॥ सर्वदेवमयींदेवीं
सर्वरोगभयापहां॥ ब्रह्मेन्द्राविष्णुनमितांप्रणमामिसदाउमां॥ विंध्यस्थंविंध्यनिलयांदिव्यस्थाननिवासिनीं॥ यो
गमातांचचंडिकांप्रणमाम्यहं॥ ईशानमातरंदेवीमीश्वरीमीश्वरप्रियां॥ प्रणतोस्मिसदादुर्गांसंसारार्णवतारिणीं॥ यद्य
दंपठतिस्तोत्रंशृणुयाद्वापियोनरः॥ समुक्तःसर्वपापेभ्योदुर्गेयासहमोदते॥ इत्यादिभिःश्लोकैस्तुत्वाबद्धांजलिर्महीषघ्नीत्या
दिश्लोकचतुष्टयेनप्रार्थ्यविधिहीनंक्रियाहीनंभक्तिहीनंयदर्चितं॥ पूर्णंभवतुतत्सर्वंत्वत्प्रसादान्महेश्वरीइतिप्रसाद्यक्षमस्वेत्यु
क्त्वा॥ एकंपुष्पांदुर्गायेनमइतिईशान्यांनिक्षिपन्विसृज्य॥ उत्तिष्ठदक्षिंडेशिशुभांपूजांप्रगृह्यच॥ कुरुष्वममकल्याणमष्टाभिः
शक्तिभिःसह॥ गळगळपरंस्थानंस्वस्थानेरेविचंडिके॥ व्रजस्रोतोजलोर्ध्वेतिष्ठगेहेचभूतये॥ इत्युक्त्वाप्रणीतवाद्यबलघोषं

पुरतः सरंश्रोतोजलसमीपंनत्वा दुर्गेदेविजगन्मातस्वस्थानंगछपूजिते॥संवत्सरेव्यतीतेतु पुनरागमनायवै॥इमांपूजां
मयादेवियथाशक्त्यानिवेदितां॥रक्षणार्थंसमादायव्रजस्वस्थानमुत्तमं॥इतिप्रवाहयेत्॥ततोदेवीपूजास्थाक्षेत्रेशांतिक
लशोदकेनब्राह्मणैरभिषिक्तस्तोयोदक्षिणांदत्वाब्राह्मणान्भोजयित्वाबंधुभिःसार्धंभुंजीत॥अथलोहाभिसारिकं
कर्मगोविंदार्णवेभविष्योत्तरे॥नयाभिलाषीन्नृपतिः प्रतिपत्प्रभृतिक्रमात्॥लोहाभिसारिकंकर्मकारयेद्यावदष्टमी
॥प्राणदक्रपवरोदरोपताकाभिरलंकृते॥मंडपंकारयेद्दिव्यंनवसप्तकरंवरं॥आग्नेय्यांकारयेत्कुंडंहस्तमात्रंसुशोभनं
मिखलात्रयसंयुक्तंयोन्याचलदलान्वितं॥राजचिह्नानिसर्वाणिशस्त्राण्यस्त्राणियानिच॥आनीयमंडपेतानिसर्वा
ण्येवाधिवासयेत्॥ततस्तुब्राह्मणाःस्नातःशुक्लांबरधरःशुचिः॥ओंकारपूर्वकैर्मंत्रैस्तत्तल्लिंगैर्जुहुयाद्धुतं॥शस्त्रा
स्त्रमंत्रैर्हुत्वंपायसंघृतसंयुतं॥हुतशेषंतुरंगाणांगजानामुपहारयेत्॥वडूंप्रतिसराज्यंचगजाश्चान्समलंकृतान्
भ्रामयेन्नगरेनित्यंनादैर्घोषपुरःसरं॥प्रसहंन्नृपतिः स्नात्वासंपूज्यपितृदेवताः॥पूजयेद्राजचिह्नानिफलमल्यविलेपनै

हुतशेषंप्रदातव्यमोषनायनिकेगजे॥लोहनामाभवत्पूर्वमसुरःसुमहाबलः॥सदेवैःसमरेक्रुद्धैर्वहुभिःशक्रलेहुतः त
दंगसंभवंसर्वंलोहमुद्भूयतेक्षितौ॥तस्योभिहरणाद्राज्ञोविजयःसमुदाहृतः॥इति॥पूजामंत्रश्चयत्रैव॥यथाबुधःछा
दयतिशिवायेमांवसुंधरां॥तथाछादयराजानंविजयारोग्यवृद्धये॥छत्रस्य॥राशांकधवलं॥क्षौद्राक्षारडिंडीरपांडुरं॥छो
त्तारपाण्डुरितंचामरामरभूषणं॥चामरस्यैशक्रकेतोर्महावीर्यसुपर्णस्त्वामुपाश्रितः॥पतत्रिराड्विनतेयस्तथानारा
यणध्वजः॥कश्यपेयोमृताभूर्तानागारिर्बलवान्नः॥त्रयमेयोदुराधर्षोरणेदेवारिसूदनः॥गरुत्मारुतगतिस्त्वयिस
न्निहितास्थितिः॥शस्त्रवर्मायुधान्योधान्रक्षत्वंचरिपून्हन॥ध्वजस्युक्तभुग्वासोरुद्रोवायुःसोमोमहर्षयः॥नागर्क्ष
नरगंधर्वायक्षभूतगणाग्रहाः॥प्रथमाश्चसहादित्यैर्भूतेश्चमातृभिः सह॥राज्ञः सेनापतिस्कंदोदेवसैन्यैश्चाश्रितास्त्व
यिप्रहरंतुरिपून्सर्वान्राजांविजयमस्तु॥यानिप्रयुक्तान्यरिभिर्दूषणानिसमंततः॥एतानिसर्वशत्रूणांकृतानितवतेजसा॥कालनेमिवधेयद्वत्त्रिपुरघातिने॥हिरण्यकशिपायुध्येयुद्धेदेवासुरेतथा॥घोषितासितथैवाद्यघोषस्वस

मरेस्मर॥नीलांबुरामिमांदृष्ट्वानृत्यत्वाशुममाग्रय॥इतिपताकाद्याः॥दुंदुभेत्वंसपत्नानांघोषाधदयकंपन॥तवशत्रुमिपसैन्यानांमंगलानांचमंगलं॥विष्णुनात्वंधृतोनित्यंमतःशांतिंप्रयछमे॥शंखस्य॥महेंद्रनिर्मितेदिव्येदेवराजादिसेवित॥शिबिकेपाहिमांनित्यंसदात्वंसंनिधौभव॥शिबिकादीतिकयोः॥विजयोदयदोतेजारिपुघातिशुभंकर॥दुःखदुःस्वप्नमरुःशांतिःसर्वारिष्टविनाशन॥एतैर्वैसंनिधोयस्मात्तवसिंहासनंबल॥तेनसिंहासनेनित्यंवैदेमंत्रैश्चगीयसे॥त्वयिस्थितःशिवःसाक्षित्वयःशक्रासुरश्चरः॥त्वयिस्थितोरुद्रदेवत्वदर्थंतप्यतेतपः॥मेनेसेसर्वतोभद्रोभवरूपते॥त्रैलोक्यजयसर्वत्रसिंहासननमोस्तुते॥सिंहासनस्य॥गंधर्वकुलजातेस्त्वंमाभूयाःकुलदूषक॥ब्रह्मणःसत्यवाक्येनसोमस्यवरुणस्यच॥तेजसाचैवसूर्यस्यमुनीनांतपसासदा॥रुद्रस्यब्रह्मचपवनस्यबलेनच॥प्रभवाच्चकुंतासस्यसर्वस्वंतुरंगम॥स्मरत्वंराजपुत्रोसिकौरुभंचमणिंस्मर॥सुनासुरैर्मथ्यमानाक्षीरोदादमृतादिभिः॥जातउच्चैःश्रवाःपूर्वंतेननातोसिसंस्मरः॥यांगतिंब्रह्महागच्छन्मातरंपितरंहतथा॥भूम्यर्थेनृपतयोरात्रियश्चपराङ्मुख॥सूर्याचंद्रमसौवायुर्या

वत्पश्यंतिदुष्कृतं॥व्रजस्वतांगतिंक्षिप्रंतच्चापंभवेत्तव॥विष्णुतिर्यक्छेथायुद्धाधनितुरंगम॥रिपूनविजित्यसमरेसहभर्तासुखीभव॥अश्वस्य॥कुमुदैरावणःपद्मःपुष्पदंतोथवामनः॥सुप्रतीकोनलोनीलोएतेष्टदेवयोनयः तेषांपुत्रापपौत्राश्चवनाष्टोसमाश्रिताः॥मंदोमंद्रोगजश्चैवराजसंकीर्णएवच॥वनेवनेपसूतास्तेपूषानिसुमरंतिच॥पांतुत्वांवसवोरुद्रआदित्याःसमरुद्गणाःभर्तारंरक्षनागेंद्रस्वामीचाप्रतिचालपतां॥श्रवाप्रुहिजयंयुधेगमनेस्वस्तिनोव्रज॥गजस्य॥पोतारणायदुष्टानांसाधुसंग्रहणायच॥ब्रह्मणानिर्मितश्चासियवहारस्यसिध्यये॥यशोदेहिसुखंदेहिजयदोभवभूपते॥ताडयेस्त्वंरिपूंस्सर्वान्हेमदंडनमोस्तुते॥कनकदंडस्य॥सर्वायुधानांप्रथमंनिर्मितासिपिनाकिना॥शूलाद्यायुधानिष्कृष्यकृत्वामुष्टियरंमुखं॥चंडिकायैप्रदत्तासिसर्वदुष्टनिबर्हिणि॥तयाविसारितासित्वंदेवानांप्रतिपादिता॥सर्वसत्वांगभृत्तासिसर्वदुष्टनिबर्हिणि॥छूरिकरक्षमांनित्यंशांतिंयछनमोस्तुते॥छूरिकायाः॥रक्षांगानिगजान्रक्षरक्षवाजिधनानिच॥ममदेहंसदारक्षकुठारकेनमोस्तुते॥कुठारकस्य॥सर्वायुधमहामात्रसर्वदेवारिसूदन॥चापमांसमरेरक्षरक्षवाजिधनानिच॥ममदेहंसदारक्ष

साकंसायकसप्तमैः॥धृतंकरुष्वनरक्षार्थंसंरुरास्त्रंहरेणच्च॥त्रयीमूर्तिर्मातर्देवधनुरस्त्रेनमाम्यहं॥धनुषः॥ शर्मप्रदस्त्वंसमरेचर्मसैन्ययशोघ्नम॥रक्षमांरक्षणीयोरुतापनेयनमोस्तुते॥चर्मणः॥त्रासतापयशत्रूत्वंमनयालोकमायया॥प्रसीदजीवितंतेषांममसैन्यंचरक्षय॥कुंतस्य॥त्वंसिर्विसमनःखड्गतीक्ष्णधारोदुरासदः॥श्रीगमोविजयश्चैवधर्माधारस्त्वमेवचदृष्टोतवनामानिस्वयमुक्तानिवेधसा॥नक्षत्रंरुत्तिकातुर्थ्यंगुरुर्देवोमहेश्वरः॥हिरण्यचभरीरंतेधातादेवोजनार्दनः॥पितापितामहादेवस्त्वंमांपालयसर्वदा॥इत्येवंनधताक्षारुंस्तश्चमहिषासुरः॥तीक्षधारायशुधायतस्मैखड्गात्मनेनमः॥खड्गस्य॥लक्ष्मीसारिकंकर्मकृत्वैषंमंत्रपूर्वकं॥जयंप्राप्नोतिनिर्ऋतिः सर्वान्कामांसमश्नुते॥इतिलाक्षासिसारिकं॥अथ सप्तकविधानंविश्वरूपनिबंधे॥आश्विनेशुक्लपक्षेतुप्रारब्धेनवरात्रिके॥शरावोद्भवसमुत्पन्नेक्रियाकार्यंकथंबुधैः॥देवीपूजाचकर्तव्यापश्चाद्यज्ञविधानतः॥सप्तकेपूजनंप्रोक्तंदानंचैवविशेषतः॥देविमुद्दिश्यकर्त्तव्यंतत्रदोषोनविद्यतइति॥ सप्तकेपारणंमूलेनवम्याविधिपूर्वकं॥तदंतेभोजयेद्विप्रान्दानंदद्याच्चशक्तितः॥सप्तंतेसप्तकांतइत्यर्थः॥तथा

MEMORIAL

मलमासेनकर्तव्यंनवदुर्गोत्सवव्रतं॥अस्तंगतेगुरौशुक्रे सिंहस्थेविबुधाधिपे॥देवीपूजनमुद्दिष्टं स्थविरबालकैतथा॥आथारंभोविरामस्याद्वितीयादोनचिंतयेदिति॥तथास्त्रीणांविशेषउक्तोगरुडपुराणे॥गंधालंकारतांबूलपुष्पमालानुलेपनं॥उपवासेनदुष्यंतिदंतधावनमंजनमितिदिक्॥इतिनवरात्रव्रतं॥कार्तिकेशुक्लपतिपत्पूर्वविद्धायाद्या॥पूर्वविद्धप्रकर्तव्याशिवरात्रिर्बलेदिनंमितिहेमाद्र्युद्यमोक्तेः॥माधवोपि॥बलपुत्रवंचपूर्वद्युरुपवासवदाचरेदिति॥पूर्वविधायांमिथ्यर्थः॥इहतैलाभ्यंगस्त्रावश्यकः॥तथाचवृद्धवसिष्ठः॥वत्सरादौवसंतादौबलिराज्यंतथैवच॥तैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यतइति॥अत्रविशेषोहेमाद्रौस्कांदे॥प्रातर्गोवर्धनःपूज्योघृतंचापिसमाचरेत्॥पूजनीयास्तथागावस्तोज्यंवारुनदोहने॥मंत्रः॥गोवर्धनधराधारगोकुलत्राणकारक॥विष्णुबाहुकृतोच्छायगवांकोटिप्रदोभव॥गोपूजामंत्रः॥यालक्ष्मीर्लोकपालानांधेनुरूपेणसंस्थिता॥धृतंवरुतियज्ञार्थंममपापंव्यपोहतु॥अयतः संतुमेतुगावो गावोमेसंतुपुष्टतः॥गावोमेहृदयेसंतुगवांमध्येवसाम्यहमिति॥ततोपराह्णसमयेपूर्वेस्यांदिशिभारत॥मार्गपालिंप्रबध्नीतुगस्तं

मेथपादपे॥कुशकाशमयीं दिव्यांलवेकेबर्हिर्मुनि॥मंत्रः॥मार्गेपालि नमस्तुभ्यं सर्वलोकसुखप्रद॥विधेयैःपुत्रदारा
धैपुनरेषिदृत्तस्यमे॥मार्गेपालितले नेयं यांतिगोवाजजातयः॥राजानोराजपुत्राश्चब्राह्मणाःशूद्रजातयः॥मार्गेपालिंस
मुल्लंघ्यनीरुजःस्युःसुखान्विता॥भविष्ये॥कृत्वैतत्सर्वमेवेरात्रौदेवपतेर्बले॥पूजांकुर्यान्नृपःसाक्षाद्भौमंउलकेशु
भे॥बलिमालिख्यदेयंश्चवर्णकैःपंचरंगकैः॥गृहस्यमध्यशालायांविशालायांततोर्चयेत्॥लोकस्यापिगृहस्यांतःशो
भ्यायांशुक्लतंडुलैः॥संस्थाप्यबलिराजानंफलैःपुष्पैश्चपूजयेत्॥मंत्रस्तु॥बलिराजनमस्तुभ्यंदेवदानववंदित॥इं
द्रत्रोमहाशास्त्रविष्णुसांनिध्यदोभव॥ब्राह्मे॥तस्यांघृतेंप्रकर्तव्यंत्रमातेतत्रमानवैः॥तस्मिंयूतेजयोयस्यतस्य
संवत्सरंजयः॥पराजयोविरूपाक्षलक्षनाशकरोभवेत्॥दयितांश्चसहितैःस्तयासार्धंभवेन्निशीति॥इतिप्रतिपं
निर्णयः॥अथद्वितीयासातुपरैव॥युग्माग्नेतिवचनात्॥एकादश्यष्टमीषष्ठीद्वितीयाचचतुर्दशी॥त्रयोदशीम
मावास्याउपोष्याःस्युःपरान्विताइति॥विष्णुधर्मोत्तरे॥अत्रविशेषस्कांदे॥आषाढस्यसितेपक्षेद्वितीयापुष्य

१९

संयुता॥तस्यांरथेसमारोप्यरामवेभद्रयासह॥यात्रोत्सवंप्रकुर्याथप्रीणयेत्तद्विजान्बहून्॥भद्रासुभद्रा॥श्रावण
कृष्णद्वितीयाद्वयुत्तपोच्यते॥सापूर्वविद्धायाह्या॥तदाह॥संवर्तः॥कृष्णाष्टमीद्वयुत्तपासावित्रीवटपत्रिका॥कामत्रयो
दशीरंभाउपोष्यापूर्वसंयुताइति॥तद्वत्स्कांदे॥ऊर्जेशुक्लद्वितीयायामपराह्णेर्चयेद्यमं॥स्नानंकृत्वासानुजायांयमलो
कंनपश्यति॥ऊर्जेशुक्लद्वितीयायांपूजितंतर्पितोयमः॥वेष्टितःकिंकरैर्दृष्टैस्तस्मैयच्छतिवांछितं॥भविष्येपि॥कार्तिके
शुक्लपक्षस्यद्वितीयायांयुधिष्ठिर॥यमंयमुनयापूर्वंभोजितःस्वगृहेर्चितः॥अतोयमद्वितीयेतित्रिषुलोकेषुविश्रुता
ख्यांनिजगृहेविप्रभोक्तव्यंचततोनरैः॥स्नेहेनभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्धनं॥दानानिचप्रदेयानिभगिनीभ्योविशेष
तः॥स्वर्णालंकारवस्त्रान्नपूजासंस्कारभोजनैः सर्वाभगिन्यः संपूज्याश्चभावप्रतिपन्नकः॥अभावेभगिनीनांचतिप
न्नकाः तत्स्थानीयाः॥ब्रह्मांडेपि॥यातुभोजयतेनारीभ्रातरंयुग्मकेतिथौ॥अर्चयेद्वापितांबूलैर्नसावैधव्यमाप्नुयात्॥भ्रा
तुरायुः क्षयोराजन्मतत्रकार्हिचित्॥इतिद्वितीयानिर्णयः॥अथतृतीयासातुपरैव॥तदुक्तंविष्णुधर्मोत्तरे॥एकादश्य

ष्टमीषष्ठिपौर्णमासिचतुर्दशि॥ अमावास्यातृतीययातउपोष्याः परान्विताः॥ रंभाव्रतंतु पूर्वेद्युरुत्तरेद्युश्चतुर्दशी॥ संपूज्यावर्जयित्वैकांतृतीयांद्विजसत्तमान्॥ अन्येषु सर्वकार्येषु गणयुक्ताप्रशस्यतेति॥ गणश्चतुर्थी चैत्रेशुक्लतृतीयांदोलोत्सवोरामार्चनचंद्रिकायां॥ गारुडे॥ माघेशुक्लतृतीयायांजानकीरमणंप्रभुं राजोपचारैः संपूज्यमासमांदोलयेत्फलो॥ दक्षिणाभिमुखंदेवंदोलमानंसुरेश्वरं॥ पूजितंसत्फलद्बध्यात्सर्वपापैः प्रमुच्यते॥ चैत्रेमासिसितेपक्षे तृतीयायांरमापतिं॥ दोलारूढंसमभ्यर्च्यमासमांदोलयेत्फलो॥ सर्वैरुदोलारूढंप्रशंतिफलंचमधुमाधवे॥ अपराधसहस्रैस्तैर्मुक्तास्तेनात्रसंशयः॥ दोलारूढस्य फल्गुन्यांयेपश्यंतिजनाहरं॥ सर्वपुण्यफलावाप्तिर्निमिषेनिमिषंभवेत्॥ इयमेवगौरीतृतीयोच्यते॥ तत्रमुहूर्तमात्रापरयुताग्राह्या॥ वचनंत्वग्रेलक्ष्यते॥ मदनरत्नेस्कांदे विशेषः॥ तृतीयायांयजेद्देवीं शंकरेणसमन्वितां॥ कुंकुमागुरुकर्पूरमाणिवस्त्रैः सगंधकैः॥ स्रग्गंधधूपदीपैश्चरत्नैर्नविशेषतः॥ श्रांदोलयेत्ततोवत्सशिवोमांतुष्टयेसदेति॥ वैशाखशुक्लतृतीयायांत्रिलोचनेयात्रोक्ता २०

काश्मीरखंडे॥ राधाशुक्लतृतीयायांस्नात्वायैलिप्पिलेह्रदे॥ संतर्प्ययेत्पितॄन्देवान्त्रिलोचनमथार्चयेदिति॥ इयमेवाक्षयतृतीयोच्यते॥ तदुक्तंभविष्ये॥ यत्वेषाकुरुशार्दूलवैशाखेतुमहातिथिः॥ तृतीयासाक्षयालोकेगिर्वाणैरभिवंदिता॥ यत्किंचिद्दीयतेदानंस्वल्पंवायदिवाबहु॥ तत्सर्वमक्षयंयस्मात्तेनैवमक्षयास्मृतेति॥ इयमेवयुगादिः॥ सापूर्वविद्धव्यापिनीग्राह्यातदुक्तंनारदीये॥ देशेशुक्लेतथाकृत्स्नेयुगादिकवयोविदुः॥ शुक्लपूर्वाद्धिकेयातेरुद्धेचेवापराह्णिकेऽपीति॥ अत्रविशेषोगोविंदार्णवेदेवीपुराणे॥ तृतीयायांतुवैशाखेरोहिण्यर्क्षंप्रपूज्यते॥ उदकुंभप्रदानेनत्रिलोकंमहीयते॥ कलशदानमंत्रस्तु॥ एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः॥ अस्यप्रदानात्तृप्यंतुपितरोपिपितामहाः॥ गंधोदकतिलैर्मिश्रैः सान्नंकुंभंसदक्षिणं॥ पितृभ्यः संप्रदास्यामित्र्यक्षय्यमुपतिष्ठतुइति॥ एतदसंभवेतिलतर्पणंवा कार्यमित्यलं॥ तत्रैवविष्णुपुराणे॥ पानीयमप्यत्रतिलैर्विमिश्रंदद्धापितृभ्यः प्रयतोमनुष्यः॥ श्राद्धस्यतंतेनसमासहस्रंरक्षंस्यमेतन्मुनयोवदंति॥ तथाचात्रमलमासेसतिविशेषश्चंद्रिकायां॥ योगादिकंमासिकंचश्रा

संचापरपक्षकं मन्वादिकं तैथिकंचकुर्यान्मासद्वयेपिच । अपरपक्षोनामकृष्णपक्षोत्रगद्यते मलमासेमहाल
यस्यनिषेधात् ज्येष्ठशुक्लतृतीयायांभातृतीयोच्यते सापूर्वाग्राह्या तदुक्तंमाधवीयेस्कंदे । दृहुतपातथारंभा
सावित्रीवटपेटकि । कृष्णाष्टमीचफल्गुन्यांकर्तव्यासंमुखीतिथिरिति संमुखीनामसायाह्नव्यापिनीत्यर्थः । भाद्रकृष्ण
तृतीयायांविशालाक्षीयात्रोक्तकाश्मीरखंडे । भाद्रकृष्णतृतीयायामुपवासपरैर्नरैः । कृत्वाजागरणंरात्रौ विशालाक्षि
समीपतः । अत्ररात्रव्यापिनीग्राह्या । रात्रौजागरणविधान । भाद्रशुक्लतृतीयाया हरितालिकोच्यते । सामुहू
र्तमात्रापिपरयुतायाह्या । सदाहमाधवः । मुहूर्तमात्रसत्वेपिदिनेगौरीव्रतंपरे । शुद्धाधिकायामप्येवंगणयोगत्रसं
ज्ञानादिति । चतुर्थीयुक्तायांतुफलमाहमाधवीये त्रापस्तंबः । चतुर्थीसंहितायांतुसातृतीयाफलप्रदा । अवैधव्य २९
करस्त्रीणांपुत्रपौत्रप्रवर्धनि । द्वितीयायोगोप्रसवायमारु । सएवद्वितीयात्रोषसंयुक्तंयाकरोतिविमोहिता । सौवै
धव्यमवाप्नातिप्रवदंतिमनीषिणेति । आश्विनकृष्णतृतीयायांललिताचंद्रेव्यायाचोक्तकाश्मीरखंडे । एषकृष्णत

तीयायांललितांप्रतिपूज्यवै । नारीवापुरुषोवापिलभतेवांछितंफलमिति । तृतीयायानिर्णयः । अथचतुर्थीसापरविद्धा
ग्राह्या । युग्मभूतानामितियुग्मवाक्यात् माधवीयेबृहद्वसिष्ठोपि । एकादशीतथाषष्ठी अमावास्याचतुर्थिका । उपोष्याःप
रयुक्तापराह्णेणसंयुताइति । सर्वासुचतुर्थीषुढुंढियात्रोक्ता । काश्मीरखंडे । कुर्यात्सतिचतुर्थ्यांतुविघ्नेशितुःसदा ब्रा
ह्मणप्यस्तदुद्दश्यादेयावेमोदकामुदेति । लिंगे । अंगारकचतुर्थ्यांयः स्नातोत्तरवहांभसि । अभ्यर्च्यांगारकेशानंनमस्यं
तिनरोत्तमाः । नतेषांयरुपीडाचकदाचित्कापिजायतइति । नागचतुर्थीतुमध्याह्नव्यापिनीपरविद्धाग्राह्या । तदाहगोविं
दार्णवे । देवलः । युग्मंमध्यंदिनेयत्रतत्रोपोष्यकणिम्बरान् क्षीरेणाप्यायपंचभ्यांपूजयेत्प्रयतानरइति । युग्मंचतुर्थी
विनायकव्रतेतृतीयायुतेवातदुक्तंतत्रैव । चतुर्थीतुतृतीयायांमहापुण्यफलप्रदा । कर्तव्यंव्रतमित्येतद्गणनाथसुतापि
णी । श्रावणकृष्णचतुर्थीसंकष्टचतुर्थीसुच्यतेसाचंद्रोदयव्यापिनीग्राह्या तदुक्तंस्कंदे । श्रावणबहुलेपक्षेचतुर्थ्यांच
विधूदये । तस्मिन्दिनेव्रतंकार्यं संकष्टाख्यंसुरेश्वरइति । दिनद्वयेचंद्रोदयसत्वेअसत्वेपूर्वैव । माघविहायगणेश्वरइतिव

चनात्॥ भाद्रकृष्णचतुर्थी बहुलासापूर्ववेव॥ तदुक्तंगोविंदार्णवे पुराणसमुच्चये॥ गौर्याश्चतुर्थी वरधेनुपूजाउर्गाचनंडुंढेर
होलिकेच॥ वत्सस्यपूजाशिवरात्रिरताःपरान्विताःघृतिन्रपंसराष्ट्रंइति॥ भाद्रइतिशुक्लचतुर्थीवरदचतुर्थीस्मृच्यते॥ सामध्या
ह्नव्यापिनीपूर्वविद्धाग्राह्या॥ पूर्वाह्नमध्याह्नव्यापिभाद्रव्याप्तिसत्वेवापूर्ववेव॥ मातृविद्धाप्रशस्यतइतिवचनात्॥ इयंचरविसो
माभ्यांयुतामहतीस्मृच्यते॥ तदुक्तंगोविंदार्णवे वाराहपुराणे॥ भाद्रशुक्लचतुर्थीयासोमेनार्केणवायुता॥ महतीसात्रविघ्नघ्ना
स्याच्चयेष्टंलभेन्नरइति॥ अस्यांचंद्रंनपश्येत्॥ तदाहतत्रैवमार्कंडेयः॥ भाद्रेमासिसितेपक्षेचतुर्थीस्यातियोगिनी॥ मिथ्याभि
दूषणंकुर्याद्यत्रौषध्यन्नतंसदा॥ अत्ररात्रिभक्षणादिवादूषनेनदोषइतिरात्रौनेवचंद्रंपश्येदितिप्रधानात्॥ तद्दोषशांत्यर्थंतत्रैवपुराणां
तरे॥ ततश्चतुर्थ्यांरात्र्यायांप्रमादाद्दृश्यमानवै॥ पेठत्येतेणिकांवाक्यंपाऊखोवाउदञ्मुखः॥ सिंहःप्रसेनमवधीत्सिंहोजां
बवताहतः॥ सुकुमारकुमारोदीस्तवह्येषस्यमंतकइति॥ वरदचतुर्थीत्वंचास्यविहितंतत्रैव॥ सुरासुरानागयुवतीगणैश्चाक्लिप्त
र्वकं॥ तस्यांप्रादाद्दरंयस्मात्तस्माद्वरचतुर्थीतिमाचेचतुर्थीतिलचतुर्थी॥ तदुक्तंकाशीखंडे॥ माघशुक्लचतुर्थ्यांतुनक्तव्र

॥२२॥

तपरायणाः॥ येत्वांदृष्ट्वाचचर्यंतितेर्च्यास्युरसुरद्विषां॥ विधायवाणकींयात्रांचतुर्थीप्राप्यतामसीं॥ शुक्लान्तिलान्युतै
र्बध्वापान्नीयालूडुकान्वतीं॥ तपसीमाघी॥ अत्रनक्तव्रहणात्यदोषव्यापिनीग्राह्येतिदिक्॥ इतिचतुर्थीनिर्णयः॥
अथपंचमी॥ साचचतुर्थीयुतैवग्राह्या॥ युगभूतानामितियुग्मवाक्यात्॥ पंचमीसप्तमीचैवदशमीचत्रयोदशी
प्रतिपन्नवमीचैवकर्तव्यासंमुखीतिथिरितिपैठीनसिवचनाच्च॥ संमुखीसायाह्नव्यापिनीग्रह्यैवतेपि॥ प्रतिपत्पंच
मीभूतसावित्रीपूर्णिमा॥ नवमीदशमीचैवनोपोष्याःपरसंयुताइतिमाधवीयेस्कांदेपि॥ पंचमीचथोतेकार्याच
तुर्थीसंयुताविभोइतिमत्स्यपुराणे॥ ब्रह्मणोयोदिनस्यादिःकल्पादिःसाप्रकीर्तितः॥ वैशाखस्यतृतीयायाशुक्ल
ह्नाफाल्गुनस्यच॥ पंचमीचैत्रमासस्यतथैवांसातथापरा॥ शुक्लात्रयोदशीमाघेकार्तिकेकृष्णसप्तमी॥ नवमीमार्ग
शीर्षस्यसप्तैताःसंमराम्यहं॥ कल्पानामादयोह्येतादत्तस्याक्षयकारकाः॥ अत्रेताःशुक्लाःपूर्वाह्णिकाःकृष्णास्त्र
पराह्णिकइतियुगादिव्यवस्था॥ शुक्लपक्षेतिथिर्ग्राह्यासामन्युदितोरविः॥ कृष्णपक्षेतिथिर्ग्राह्यासास्यामस्तंगतोरविः॥

॥२२॥

रविरितिवाक्यात्॥ अत्रपक्षविशेषानुपादानेशुक्लोज्ञेयः॥श्रावणशुक्लपंचमीनागपंचमीत्युच्यतेसापरविद्धाग्राह्यातदुक्तं
चमत्कारचिंतामणौ॥ पंचमीनागपूजायांकार्यासाषष्ठीसमन्विता॥ तस्यांतुषितानागाःतरासचतुर्थिकृति॥प्रतापमार्तंड
स्मृत्यंतरेपि॥ श्रावणेपंचमीशुक्लासंपोक्तानागपंचमी॥तांपरित्यज्यपंचम्यश्चतुर्थीसहिताहितइति॥ अत्रकर्तव्यमुक्तंका
शीखंडे॥यःस्नातोनागपंचम्यांकुंडेवासुकिसंज्ञिके॥ नतस्यविषसंसर्गोभवेत्सर्वसमुद्भवः॥ कर्तव्यानागपंचम्यांयात्रावर्षा
सुतत्रैव॥नागाःप्रसन्नाजायंतेकुतस्यापिसर्वदेति॥गोविंदार्णवेभविष्येपि॥ श्रावणेमासिपंचम्यांशुक्लपक्षेनराधिप॥द्वार
स्थात्तयतोलेख्यागोमयेनविषोल्बणं॥पूजयेद्विधिवद्वीरंदधिदूर्वांकुरैःकुशैः॥गंधपुष्पोपहारैश्चब्राह्मणानांचतर्पणैः
येतस्यांपूजयंतीहनागान्भुक्तिपुरःसराः॥नेतेषांसर्पतोवीरभयंभवतिकुत्रचित्॥ भाद्रशुक्लपंचमीऋषिपंचमीत्युच्य २३
ते॥तदुक्तंब्रह्मणे॥नभःस्यशुक्लपंचातुयदाभवतिपंचमी॥नद्यादिकेतथास्नात्वाकृत्वानेमित्तिकंकर्मगत्वानिजगृहंपुनः॥ वेदिंसम्यक्प्रकुर्वीतगोमयेनोपलिप्यतां॥रंगव

छिसमायुक्तांनानापुष्पोपशोभितां॥ तत्रसप्तऋषीन्दृष्ट्वान्मल्लियुक्तानपूजयेत्॥ तत्रपंचमीपूर्वेयुतायाद्योतिमदनरत्नेयु
गमवाक्यात्॥माधवीयेप्येवं आश्विनशुक्लपंचमीमुपांगललितेनाच्यते॥सायद्यपिनिबंधेष्यनुक्तातथाप्यतिप्रचारलोनिर्ण
येते॥तत्रपंचमीमध्याह्नव्यापिनीग्राह्या॥ तत्रैवदर्जाविधानात्॥माधवीयेस्मृत्यंतरेपि॥ पूजाव्रतेपुसर्वेषुमध्याह्नव्यापिनी
तिथिरिति॥मार्गशीर्षेपंचम्यांनागपंचमीशुक्लेमार्गशिरेपुण्याश्रावणेयापंचमी॥ स्नानदानैर्बहुफलानागलोकप्रदायिनी
तिरुमाद्रौस्कांदे॥इयमपिपरयुतैवग्राह्या॥ पंचमीनागपूजायांकार्यासाषष्ठीसमन्वितातिपूर्वोक्तवचनात्॥ इतिपंचमीनिर्णयः
॥अथषष्ठी॥ सातुपूर्वेद्युरुपवासव्रतादिपुरस्कारव्रतानिरिक्तासप्तमीयुतैवग्राह्या॥ षण्मुख्योरितियुग्मवाक्यात्॥माधवीये
स्कांदेपि॥नागविद्धानकर्तव्याषष्ठीचैवकदाचन॥ सप्तमीसंयुताकार्यासाषष्ठीधर्मार्थचिंतकैरिति॥अत्रपंचमीवेधःषण्मुख्य
र्तीयकोज्ञेयः॥नागाद्यदर्शनाद्दीपैर्दग्धपत्रांतिथिरितिमितिवचनात्॥तेनषण्मुखर्तंन्यूनपंचमीयोगपूर्वेव॥ अस्यामेव
परयोगेलोलार्कयात्रोक्ता॥ कार्तीरंडे॥हृतानियानिपापानितरेःसंवत्सरैरपि॥नश्यंतिक्षणतस्तानिषष्ठ्यार्केलोलदर्शनात

लोलोलोलर्कः॥ वार्षिकयात्रापुक्तातथैव॥ मार्गशीर्षस्यसप्तम्यांषष्ठ्यांवारविवासरे॥ विधायवार्षिकीयात्रांनरपापै
त्रमुच्यते॥ आषाढशुक्लषष्ठीस्कंदषष्ठीत्रुच्यते॥ सापंचमीयुतायाह्या॥ तदुक्तंस्कांदे॥ छत्राष्टमीस्कंदषष्ठीत्रि
रात्रिश्चतुर्दशी॥ एताःपूर्वयुताकार्यालिप्यंतेपारणंभवेदिति॥ भाद्रछत्रषष्ठी॥ योगविशेषणकपिलाषष्ठीत्रुच्यते
तदुक्तंस्कांदे॥ पुराणसमुच्चये॥ मार्गशुक्लषष्ठीचंपाइत्रुच्यते॥ तस्यांखंडेरायाद्यवेधेराद्दिण्यांसाषष्ठीकपिलायुत
तृसंयोगेतुचतुर्थेतुनिर्दिष्टापरमेष्ठिना॥ माघशुक्ला भाद्रमासिसितेपक्षेभानौचैवकरास्थिते॥ पतंकुजेचरादिण्यां
साषष्ठीकपिलाभवेत्॥ संयोगेतुचतुर्थेतुनिर्दिष्टापरमेष्ठिना॥ मार्गशुक्लषष्ठीचंपायुच्यते॥ तस्यांखंडेरायास्य
वेधेतिसंयुता॥ रविवारेणसंयुक्ताचंपेतीहप्रकीर्तिता॥ मार्गशीर्षेनलेपक्षेषष्ठ्यांवारेषुमालिनी॥ तातधारा
गतंचंद्रलिंगंस्याद्दृष्टिगोचरमिति॥ इयंचैवंयोगविशेषणपूर्वापरायाग्राह्या॥ तदभावेसप्तमीयुताकार्या॥ पूर्वोक्त
सामान्यनिर्णयादितिदिक्॥ इतिषष्ठीनिर्णयः॥ अथसप्तमी॥ सासर्वत्रपूर्वैवषण्मुन्योरितिवचनात्॥ स्कांदेषष्ठ्या

MEMORIAL

युतासप्तमीचकर्तव्यातातसर्वैरिति॥ वैशाखशुक्लसप्तम्यांगंगापूजोक्ताब्रह्मणे॥ वैशाखेशुक्लसप्तम्यांजह्नुनाजान्ह
वीस्वयं॥ क्रोधात्पीतापुनस्त्यक्ताकर्णरंध्रातुदक्षिणात्॥ तांतत्रपूजयेद्देवींगंगागमनमेरवलामिति॥ अत्रपूर्वविद्ध्या
पिनीग्राह्या॥ दिनद्वयेसाम्येनपूर्वविद्धगामिन्यांपूर्वसामान्यनिर्णयात्॥ आश्विनशुक्लसप्तम्यांदेविपूजायांपरयुताया
ह्या॥ युगाद्यावर्षवृद्धिश्चसप्तमीपार्वतीप्रिया॥ एवंरूपयमीक्षंतेनतासुतिथियुग्मतेति॥ व्रतापमार्तंडेभविष्योक्तेभव
र्षेवृद्धिंजन्मतिथिः॥ अत्रैवमूलऋक्षेपुस्तकस्थानमुक्तंरूपमाले॥ मूलऋक्षेसुराधीत्रापूजनीयासरस्वति॥ पूजयेत्यत्स
रंदेवीयावद्वैहस्तवमृक्षकं॥ नाध्यापयेन्नलिखेन्नधियतत्कदाचन॥ पुस्तकेस्थापितेदेविविद्या कामोद्विजोत्तमः॥ संयरु
पि॥ आश्विनस्यसितेपक्षेमेधाकामः सरस्वति॥ मूलेनावाहयेद्देवींश्रवणेन विसर्जयेत्॥ माघशुक्लासप्तमीसथ
सप्तमीत्रुच्यते॥ सारुणोदयव्यापिनीस्नानादौग्राह्या॥ सत्येअरुणतुल्यास्त्रियुक्तामाघस्यसप्तमी॥ अरुणोदय
वेलायांतस्यांस्नानंमहाफलमितिचंद्रिकयाविरुद्धं॥ अरुणोदयवेलायांशुक्लामाघस्यसप्तमी॥ पयोगेयदि

ऊष्यतकोटिसूर्ययद्दैः समेरितिस्मसंतराच्च दिनद्वयेरुणोदयेचेत्पूर्वैव॥ षण्मुन्योरितियुग्मवचनात्॥ अथकृष्णेभविष्ये सौवर्णेरजतेताम्रेभक्त्यावुभयेयथवा॥ तैलेनवर्तिंदीप्तांतव्यामरूपजतरंजिता॥ समाप्तिमनाप्नुहि भूत्वाशिरसिदीपकं॥ भास्करंहृदयेध्यात्वासंतर्प्यपितृदेवताइति॥ महाराजनकुरूमंपरिहरन्मुंचेत्॥ काशीखंडेविशेषः॥ लोलार्केरयसप्तम्यांस्नात्वा गंगाजलेशुचौ॥ सप्तजन्मकृतैः पापैर्मुक्तोभवतितत्क्षणात्इति॥ इयंचपक्षीरविवासरयोगेलतिफलप्रदाषष्ठीचसप्तमीयो वारश्चेद्रुमालिनः योगोयंचंद्रचंद्रनामसहस्रार्कयद्दैः सामितिस्मृतिसप्तमीति॥ इतिसप्तमीनिर्णयः॥ अथाष्ट मीसाकृष्णापूर्वशुक्लापरायाम्॥ शुक्लाष्टमीचैवशुक्लपक्षेचतुर्दशी॥ पूर्वविद्धानकर्तव्याकर्तव्यापरसंयुतेति॥ कृष्णप क्षेष्टमीचैवकृष्णपक्षचतुर्दशी॥ पूर्वविद्धैवकर्तव्यापरविद्धानकर्हिचित्॥ उपवासेषुराजेंद्रएधर्मसनातनः इतिनिगमात्॥ स र्वाष्टमीषुभैरवयात्राकाशीखंडे॥ अष्टमीचचतुर्दश्यांरविभौमदिवासरे॥ यात्रांचभैरवींकृत्वानरःपापैः प्रमुच्यते॥ अत्रैव॥ अष्टम्यांचचतुर्दश्यांभौमवारेविशेषतः॥ संपूज्यसततंकाश्यांदुर्गादुर्गतिनाशिनीमिति॥ चैत्रशुक्लाष्टम्यांविशेषस्तत्रैव

२५

चैत्राष्टम्यांमहायात्राप्रवान्याः कारयेत्सुधीः॥ अष्टाधिकाःप्रकर्तव्याव्रतकृत्वांदक्षिणाश्चंचपरयुताद्याद्ययुग्मवाक्या त्॥ श्रावणकृष्णाष्टमीदेया॥ जन्माष्टमीजयंतीचतत्रकेवलजन्माष्टमीरोहिणीयुक्ताजयंती॥ तत्राद्योक्तास्कंदे॥ अष्टमीश्रा वणेमासिकृष्णपक्षेयदाभवेत्॥ कृष्णजन्माष्टमीज्ञेयामहापातकनाशिनी॥ पुराणांतरेपि॥ श्रावणबहुलेपक्षेकृष्णजन्माष्ट मीव्रते॥ रात्रियुक्तांप्रकुर्वीतविशेषेणेंदुसंयुता॥ जयंतीत्युक्तावह्निपुराणे॥ कृष्णाष्टम्यांभवेद्यत्रकलैकारोहिणीयदिजयंतीना मसाज्ञेयाउपोष्यासाप्रयत्नेति॥ स्कांदेपि॥ प्रजापत्यनसंयुक्ताअष्टमीतुयदाभवेत्॥ श्रावणेबहुलेयातुसर्वपापप्रणाशि नी॥ जयंपुण्यंचकुरुतेनयंतीतांविदुर्बुधाः॥ शैवपुराणेशिवपुष्पंवाक्यं॥ स्थूणवत्सप्रवक्ष्यामिअष्टमीमदनिर्णयं॥ श्रावण कृष्णपक्षस्यघटिषष्टिर्यदाभवेत्॥ तदाजन्माष्टमीख्यातासंपूर्णासाप्रकीर्तिता॥ रोहिणीऋक्षसंयुक्ताजयंतीसातुक थ्यते॥ जयंतीयदिलभ्येततत्रपुण्यंनगण्यतेति॥ पाद्मे॥ प्रेतयोनिगतानांतुप्रेतत्वंनाशितंजनैः यैः कृताश्रावणेमा सिकृष्णाष्टमीरोहिणीयुता॥ किंपुनर्बुधवारेणसोमेनापिविशेषतइति॥ सोमसोमवारइतिकश्चित्॥ युक्तंतुचंद्रोदयइति

अर्धरात्रेतुयोगोयंतदापक्षदयेसतीतिविद्धुधर्नोत्तरेकमूलकल्पनालाघवात्। तत्रजन्माष्टमीनिरूपयेनकु
र्वंतिजानंतःकृष्णजन्माष्टमीव्रतं॥ तेनवंतिनराप्राज्ञाव्यालाव्याघ्रोश्वकानने॥ भविष्येचस्कांदेकरणेनिष्टश्रुते॥
श्रावणेबहुलेपक्षेकृष्णजन्माष्टमीव्रतं॥ नकरोतिमहापापीव्यालीभवतिकानने॥ भविष्येच जयंत्यपिनिशाकाम्या
च॥ नित्योक्तोस्कांदे॥ श्रीकृष्णेनतुयत्पापंश्रावकृष्णस्यभोजने॥ तत्पापंलक्षतेकुंतिजयंतीविमुखानराः॥ नकरोतिय
दाविद्धोजयंतीसंभवंव्रतं॥ यमस्यवशमापन्नःसकृतेनारकीव्यथांदृष्ट्वाकरुणोत्रत्रवायस्मरणात्॥ कामाप्युक्तास्कां
दे॥ महाजयार्थीकुर्वीतांजयंतींमुक्तयेथवा॥ धर्ममर्थंचकामंचमोक्षंचमुनिपुंगवं॥ ददातिदांछितानार्यानृयेचा
न्यतिइतिदुर्लभाः इतिफलविशेषश्रवणात्॥ अस्मिंश्चव्रतेउपवासः पूजाचेत्कार्यंप्रधानंजन्माष्टमीदिनेप्राह्येयेन
भुक्तेहिजोन्नम॥ त्रैलोक्यसंभवंपापंतेनभुक्तेनसंशयइतिस्कांदात्॥ अर्धरात्रेतुरोहिण्यांदाहृस्याष्टमीयदि॥ त
स्यामभ्यर्चनंशौरेर्हंतिपापंत्रिजन्मजं॥ सोपवासोहरेःपूजांकृत्वानरोतिभविष्यपुराणात्॥ चफलसंबंधवाक्यो

क्तिनव्याःतन्न॥ चित्रोक्तिर्नेरपेक्षफलसंबंधात्प्रयोगापत्तेः॥ नतुपूर्वोदाहृतेषुवाक्येषुगौरवपरिजीहिषयाकेवलं
फलंसबंधएवक्रियते॥ श्रावणेबहुलेपक्षेकृष्णजन्माष्टमीव्रतं॥ नकरोतिनरोयस्तुभवतिक्रूरराक्षसइत्यादिषुकाल
विधायकेषुभविष्यपुराणादिवचनेषुकृष्णजन्माष्टमीव्रतशब्देनतयोरुपादानाद्दर्शपूर्णमासराजसूयादिवत्प्रयोगैक्य
मितिचेन्न॥ प्रतिस्वकृवाक्येःपृथक्फलसंबंधेऽपिक्वचित्रादिवत्परस्परनैरपेक्षेणैतिकर्तव्यतायाअप्यन्वयात्तस्मिन्न
एवप्रयोगविधिःकल्प्येत॥ एवंचैकशब्दोपादानमपियज्ञेष्वपुनासोमेनेत्यादिवन्नविरुध्येत॥ अस्तिप्रयोगांतो
तिचेन्न॥ अनंतरस्वकृतव्रतानुष्ठानपरतयैकप्रयोगलेखनविरोधात॥ तस्मात्सोपवासःदूरेःपूजामित्यनंतरोपन्य
स्ते॥ मासिभाद्रपदेश्यामेकृष्णपक्षेधरात्रिके॥ क्षणेकेवृषराशिस्थेशकृक्षेरोहिणीसंज्ञके॥ योगेस्मिन्वसुवाद्रिदेव
कीमामजीजनत्॥ तस्मान्मांपूजयेत्तत्रशुचिःसम्यगुपोषितइत्याद्यैउपवासस्यगुणत्वात्प्रतीतेश्चसदृतोधा
वतीत्यादिवत्फलसंस्कारःपूजैवप्रधानं॥ एवंचोपवासस्यपरार्थेनिर्वर्तेयस्तद्दाकोफलोलूखलःसकेवलस्तावक

एवपर्णतादिवत् अंगफलश्रुतिरपवादइतिन्यायात। ननुवासुदेवंसमुद्दिश्यसर्वपापप्रशांतयेऽउपवासंकरिष्यामिह
ल्लाष्टम्यांनभस्यहं। अथहल्लाष्टमीदेवींनभस्यंद्वसरोरोहिणी। अचीयित्वोपवासेनभोक्ष्येऽमपरेऽनीतिभविष्योक्तेः
संकल्पवाक्यउपवासस्यकर्तव्यतेनोलूखलादापिप्रधानमितिचेन्न। अंगत्वेप्युपवासस्यक्रियासंबंधिनवाऽप्रकाश
श्रयन्मंत्रः करणत्वंभजेतइतिन्यायात क्रियासंबंधेनोपवासप्रकाशकत्वेनापिमंत्रस्यकरणत्वोपपत्तेः उपवासस्तेवती
या उपवासस्यपूजाकरणत्वासंभवात ननुपूर्वोदाहृतयोः पूजाफलसंबंधबोधकयोर्वाक्ययोरकरणानिंदार्थवादादेर
भावात्कथन्नतस्यनित्यत्वदोषइतिचेन्न उक्तयुक्त्योपूजायाफलसंबंधपूर्वोदाहृतेषुश्रावणबहुलेपक्षेहल्लादिपूजायाश्च
कालउक्तोविष्णुधर्मोत्तरे। रोहिणीसहिताहल्लामासिभाद्रपदेष्टमी। सप्तम्यामर्धरात्रेचार्धः कलयापियदाभवेत् त
त्रजातोजगन्नाथः कौस्तुभीहरिरीश्वरः। तमेवोपवसेत्कालंतत्रकुर्याच्चजागरं। अर्धरात्रेतयोर्योगोयंतरापत्युदयेतथा
तथा नियतात्मासुचिः स्नातः पूजांतत्रप्रवर्तयेदिति। वासिष्ठस्तुस्पष्टंरात्रेस्यमुख्यकालस्यप्रधानोमुख्यकालः

माह अष्टमीरोहिणीयुक्तानित्यंधैरोहिणीयदि मुख्यः कालःसविज्ञेयस्तत्रजातोहरिः स्वयं मुख्यस्यकालस्य
प्रधानोमुख्यकालः। तत्रकेवलाष्टमीचतुर्धा। पूर्वेद्युरेवनिशीथव्यापिनीपरेद्युरेवोभयेद्युर्नोभयेद्युश्चेति। त
त्रप्रथमद्वितीयपक्षयोरुभयकालव्यापित्वेनसंदिग्धेवात्रतयोरपिपक्षयोः प्रातः संकल्पकालसत्वादधिका
चपरैव। ब्रह्मवैवर्तेपि। वर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमीतिरोहिण्यायुतापिचतुर्धा। पूर्वेद्युरेवनिशीथयोगव
ती। परेद्युरेवतादृशी उभयेद्युर्नोभयेद्युश्चेति। तत्रपूर्वेद्युर्निशीथयुतापूर्वैव कार्येविधापिसप्तम्यारोहिण्या
सहिताष्टमीतिपाद्मात्। सप्तमीसंयुताष्टम्यांनिशीथेरोहिणीयदि। भविताऽष्टमी दुपुण्यायत्रतंदिवाक
रावितिवह्निपुराणात्। जयंतीपूर्वविद्धायांउपवासंसमाचरेदिति गारुडाच्च। सोपवासोहरेः पूजांकृत्वातत्रनिसी
दति। अर्धरात्रेतयोर्योगोयंतरापत्युदयेतथा। रोहिणीसहिताहल्लामासिभाद्रपदेष्टमी। अर्धरात्रादधश्चोर्ध्वंकल
यापियदाभवेत्। तत्रजातोजगन्नाथकौस्तुभीहरिरीश्वरः। तथासमायेगेतुरोहिण्यांनिशीथेराजसत्तम। समा

समाजायतगोविंदोबालरूपीजनार्दनः॥ तस्मात्तंपूजयेत्तत्रनिशीथेराजसत्तमेति अवशिष्टेषु त्रिषुपक्षेषुपरदिन एवव्रतं॥ तदुक्तंब्रह्मवैवर्ते॥ वर्जनीयाप्रयत्नेनसप्तमीसहिताष्टमी॥ सक्षक्षापिनकर्तव्यासप्तमीसंयुताष्टमी॥ तस्मा दे॥ सप्तमीसंयुताष्टम्यांभूत्वाऋक्षंद्विजोत्तमेति॥ प्राजापत्यहितीयेऋक्षमुहूर्तार्द्धंभवेद्यदि॥ तदाष्ट्यामिकंज्ञेयंशेषंन्या सादिभिः पुरा॥ पाद्मे॥ मुहूर्तेनापिसंयुक्तासंपूर्णासाष्टमीभवेत॥ किंपुननवमीयुक्ताकुलकोद्योसमुक्तिदेति॥ यदातुपूर्वेद्युः रोहिणीरहितानिशीथगाचतिथिः परेद्युरपिरोहिणीसहितानिशीथस्पृक्चतदापूर्वेवयाह्या॥ कर्म कालशास्त्रस्यसर्वापेक्षयापाबल्यस्यसर्वेर्यथासिद्धत्वात्॥ रोहिणीयोगेतुप्राशस्त्यात्कलातिशयमात्रंनतुतस्य निर्णयोपयोगिता॥ नवमीबुधवारवत्॥ अन्यथाप्रेतयोनिगतानांतुप्रेतत्वंनाशितंनरैः येःकृताश्रावणमासि अष्टमीरोहिणीयुता॥ किंपुनर्बुधवारेणसोमेनचविशेषतः॥ किंपुनर्नवमीयुक्ताकुलकोद्या समुक्तिदेति॥ पाद्म वचसापूर्वेद्युरर्धरात्रेवर्तमानांरोहिणीमष्टमींसृक्काबुधनवमीयुक्तापरेवकार्यापद्येत॥ यत्तुपुनर्नव्याः॥

सत्यंकर्मकालशास्त्रंसर्वापेक्षापबलंतथापीयमस्मिन्व्रतेरैवयाद्येसेवंविधेनपातिथिकेनशास्त्रेणबाध्यते॥ प्राजा पत्यर्क्षसंयुक्ताकृष्णानभसिचाष्टमी॥ मुहूर्तमपिलभ्येतसोपोष्यासामहाफलेतिवह्निपुराणेपि॥ रुद्राष्ट्म्यांनवेद्यत्रक लैकारोहिणीस्मृता॥ जयंतीनामसोपोक्ताउपोष्यावैप्रयत्नतः॥ स्कांदे उदयेचाष्टमीकिंचिन्नवमीसकलायदि भवेत्तुबुध संयुक्तापूजाप्रजापत्यर्क्षसंयुताइति॥ त्र्यपिवर्षेरतेनापिलभ्यतेयदिवानवा॥ ब्रह्मवैवर्तेति॥ क्षेत्रेवायदिवारात्रौनास्तिचे द्रोहिणीकला॥ रात्रियुक्तांप्रकुर्वीतविशेषेणतुसंयुताइति॥ पातिथिकशास्त्रस्यकर्मकालशास्त्रापेक्षयापाबल्यं माधवाचार्यादिभिर्व्यवस्थापिनमेवेप्साङ्गं॥ तदपिन॥ तेदवाहिपातिथिकशास्त्रंकर्मकालशास्त्रबाधकंयदन्यथासि द्धंभवति॥ संभवतिलस्यन्यायोन्योर्थः॥ तथाहि॥ यत्तावद्ब्रह्मवैवर्तेयंतत्रतुसंयुतामितस्यसोमेनापिविशेषतइतिअने नैकेमूलकल्पवाद्यबलिप्सयासोमेचरपरत्वान्नास्यदिवावछेदेनरात्र्यवछेदेनवारोहिणीकलायोगेनिशीथगायाद्ये सयमर्थः निशीथगमकशब्दाभावात्॥ किंतुसोमवारयुक्तोविशेषणाधिक्येनरात्रियुक्तोग्राह्यः॥ एवंचोक्तयदिन्यूनेनिशी

थस्यर्क्षाभावे सोमवाराधिकरात्रिव्याप्तेर्निणीयत्वमुक्तं भवति यद्वा इंदुसंयुतामित्यस्य निशीथपरत्वेपि रात्रिपदेनै
वाधिकंरात्रिंलक्षयित्वाहोरात्रावछेदेनकलयापिरोहिणीयोगाभावेधिकारात्रिव्यापिनीकुहूतरस्कत्वविशेषणेत्या
दिनैतदपोह्यते सत्यपिरोहिणीयोगइंदुसंयुतेवग्राह्येति अथवानिशीथग्राह्या अधिकनिशीथव्याप्तस्यमुहूर्तमा
त्रात्मकलादुभयदिनेवैधम्यंणनिशीथस्पर्शेहोरात्रेरोहिणीयोगाभावेचविशेषणाधिक्येनेंदुसंयुतानिशीथगाया
ह्या अधिकनिशीथव्यापिनीयावत् रोहिणीयोगेत्वधिकनिशीथव्यापिनीमपिवीहायस्वल्पनिशीथयोगिनीरोहि
णीयुक्तामेवकुर्वंतीति यच्चस्कांदमुदयेरोहिणीकिंचिदिति तत्राप्युदयशब्दस्यतारापरकदयेस्मीत्याद्येकमूलकल्प
नालाघवबलिष्ठयाचंद्रोदयेपरतवांगीकार्यानसूर्योदयपरता यदित्येवंनव्याख्यायते ततोयथाश्रुतवाक्यबलाद्य
दापूर्वेद्युर्निशीथेत्वष्टमीमात्रसत्वमुत्तरेद्यश्चनिशीथस्यर्क्षिणी अष्टमीरोहिणीयुक्तापिचसतीमदाबुधवारयुक्ता
तदैवोत्तरस्यन्नतुतदभावेयावद्रचनंयार्चनक्रमितिन्यायात् यदितुबुधाभावेपिरोहिणीमात्रवशादेवोत्तरोच्यते

तदारोहिणीयोगाभावेपिबुधमात्रसद्भावादुत्तरास्यात् । अन्यतरायायेप्येतद्वचनप्रवृत्तेःस्वीकारात् कृत्तिकायोगवद्वा
योगस्यापिपाशास्यहेतुत्वाच्च अतोर्धरजनीयापत्तिः किंच यथापूर्वेद्युर्निशीथेबुधपुक्तोष्टमीसत्वउत्तरेद्युश्चनिशी
थात्पूर्वंकृत्तिकायोगेएतद्वचनादुत्तरेद्युर्व्रतएवंपूर्वेद्युर्निशीथेसमाष्टमीसत्वेपुत्तरेद्युर्बुधाधिक्यादुपवासप्राप्तिः प्रपं
चतश्चैतद्वचोव्याख्यादृतनिर्णयेयुरुक्तिः यच्चविष्णुरहस्येस्थंयदप्यत्रपुराणस्थं तत्रमुहूर्तपरंनिशीथास्यमुहूर्तपरं
कलापरंतद्वृत्तिकलापरिमितिनिरोधः वस्तुतस्त्वेतद्वाक्यद्वयमुक्तयदिनेनिशीथेष्टमीव्याप्तावव्याप्तावेकदाव्याप्तौवा
भावकात्रामतोनकर्मकालव्याप्तिबाधकं तस्मात्कर्मकालशास्त्रबाधात्पूर्वेद्यार्ह्या यदितुजयंती जन्माष्टमीव्रता
द्भिन्नंतदाद्यव्रतपरेरुक्तिः ननुजन्माष्टमीव्रतं यत्तुमाधवाचार्यैर्जयंतीव्रतेनजन्माष्टमीव्रतस्यप्रसंगसंहिरभ्य
धायि तन्नकालभेदात् सोपिचतैरेवनामभेदान्निमित्तभेदाद्रूपभेदाच्छ्रुतिभिन्नतभेदान्निर्देशाभेदाच्चकर्मभेदउक्तः सो
पुक्तः कर्मनामधेयभेदोहिस्यात्कर्मभेदः नह्यत्रजयंतीशब्दः कर्मनामकिंतुरोहिणीसहितायाअष्टम्याः रोहिणीतुयो

कृष्णापक्षेष्टम्यांरोहिणीयुक्तोत्तम . जयंतीनामसाप्रोक्ता सर्वपापहरा तिथिरितिविष्णुधर्मोत्तरात्। यदापिरूपभेदादिकृतंतन्न
पत्रेदिनधात्वर्थभेदेगुणभेदोवाप्रेतः ।नाद्यः। कर्मभेदसाधकतयाभिक्षाधिकरणोपन्यासासंगतेः।नत्याभिक्षाधिक
रणेत्वार्थभेदाद्भेदः सिध्यति॥नांत्यः।उत्पतिशिष्टस्यगुणस्यवाक्यांतरश्रवणात्। निमित्तभेदशुद्धमिश्रलभेदनिर्देशाभेद
नांतुकर्मकत्वंनकापिव्युत्पादितं।।ननुजन्माष्टमीजयंतीचशिवरात्रिस्तथैवच। पूर्वविद्धैवकर्तव्यातिथिर्यांतेचपारणं
तिभृगुवाक्येनन्यपरपुनःश्रवणलक्षणाद्भ्यासादेवभेदइतिचेन्न। एतस्यवचसोजन्माष्टमीवत्।स्यादिजयंत्यनुवादेन
पूर्वविद्धत्वगुणमात्रविधायकत्वेनाप्युपपत्तेः।अथवापूर्वोदाहृतेषुवाक्येषुउपवासपूजयेत्यपर्यायधातुनिष्पन्नाख्या
तरूपाद्यांतरादेवभेदरूपतेतत्रशब्दांतरेणोपवासपूजायोर्पादेप्युपवासस्यपूजांगत्वस्यप्राक्स्थापितत्वेनस्वातंत्र्येणक
लनिर्णयप्रयोजकत्वंप्रकारांतराद्भेदइतिचेन्न। उपलभ्यमानेस्मृतिपुराणादिघसंनिध्यनुपलंभनात्। यदिस्यात्तदापि
मितिमंत्रानमार्गेविहायशुद्धमिश्रलादिकुमार्गमाधवाचार्यैराश्रीयेत। एवमपिस्वमात्रस्यापिकत्वेनप्रकरणान्नभराद्भेदस

DR. SHYAMA PRASAD MUKHERJEE MEMORIAL

माश्रीयमाणेभक्तजयंतीव्रतेपरेह्नि .जन्माष्टमीव्रंतुसत्स्यपुत्तरदिनेनिशीथव्याप्त्याष्टम्यारोहिणीयुगेपूर्वदि
नेचकेवलायानिशीथयोगपूर्वैवेत्यात्यादितिदिक् .अथजन्माष्टमीव्रतप्रयोगः व्रतपूर्वदिनेदंतधावनं कृत्वोपवासादि
नेप्रातः सूर्यसोमोयमःकालः संध्याभूतान्यरुःक्षयः।पवनोदिक्पतिर्भूमिराकाशंखचरामराः।ब्राह्मंशासनमास्था
यकल्पध्रुमहसंनिधिमित्फल्कासफलपुष्पादितंजलपूर्णताम्रपात्रमादायमासाद्युलिख्यमुक्फलकामःपापः
क्षयकामोवाश्रीकृष्णप्रीतयेकृष्णजन्माष्टमीदेवींनभश्चंद्रसरोहिणीं .अर्चयित्वोपवासंनभोक्ष्येहमपरेह्नि।एनसो
मोघकामोस्मियस्कोविंदत्रयोजिनं।।तन्मेमुंचतुमांत्राहिपक्षितंशोकसागरे .आजन्ममरणंयावत्कृतंयन्मयादुष्कृतंकृतं .त
त्सर्वनाशयगोविंदत्रसीदपुरुषोत्तमेत्यक्त्वापात्रस्थंजलंक्षिपेत्।। ततः कदलीस्तंभवासोभिरामपल्लवयुतसजलपूर्ण
कलशोदीपैःपुष्पमालादिभिर्युतं .अगरुधूपितं .अग्निरयङ्कृष्णछागरछागगिद्वारन्यस्तमुशलादियुतंमंगलोपेतं
पद्मादिचिह्नितंदेवक्याः सूतिकागृहंविधायतस्यसंमितादिक्षितिसुसकुसुमांजलींदेवगंधर्वादीन्वस्त्रचर्मधरान्देवदेव

कीनंद्यशोदागर्गगोपीगोपान्कंसनिधायुक्तान्गोधनुकुंजरान्यमुनांतन्मध्येकालियंअन्यच्चतत्कालीनगोकुल
चरितंयथासंभवंलिखित्वासूतिकागृहमध्येपल्लदपट्टेमंचकंस्थापयित्वामध्याह्नेघृतजलैःतिलैःस्नात्वार्घरा
त्रेसपरिवारःश्रीकृष्णपूजांकरिष्यइतिसंकल्प्यकांचनीराजनीतांम्रीपैत्तलीमन्मयीतथात्रस्मैदेवत्वसंख्यायै
स्वाहेतिचमंत्रेणपञ्चप्राणप्रतिष्ठांकुर्यात्। अस्माइत्यस्यस्थानेतत्तद्देवतानामग्राह्यं गायद्भिःकिंनराद्यैःसततपरिवृ
तावेणुवीणानुनादैःशृंगारदर्शकुंजपकरलतकरैकिंकरैःसेव्यमानं पर्यंकेस्वास्तृतेयामुदितरमुखीपुंचिणीसंप्य
गास्तसादेवीदेवमातातपतिसुवदनादेवकीदिव्यरूपाइतिदेवकी मंचपिवालकंसुप्तंपर्यंकेस्तनपायिनं। श्रीवत्ससंज्ञांतंनी
लोत्पलदलछविमितिश्रीवत्संचध्यात्वा ॐ नमोदेव्यैश्रियैइतिश्रियंदेवकीसहितंवसुदेवंयशोसहितांनंदांश्रीकृष्णसहितंबल
देवंचंडिकांचनमौतैर्निर्मलैःपूजयेत्। तत्रमंत्राः योगेश्वरायदेवायेतिथायोगानांपतयेविष्णवे योगोद्भवायनित्यायगोवि
दायनमोनमः। स्नाने। यज्ञेश्वरायदेवायेतथाविश्वाद्भवायच विश्वस्यपतयेतुभ्यं गोविंदायनमोनमः नैवेद्ये। गरुडे
यज्ञानांपतयेनाथगोविंदायनमोनमः। पादो। विश्वेश्वरायदेवायतथाविश्वाद्भवायच।

यज्ञायायज्ञेश्वरायमहापतेयज्ञसंभवायगोविंदायनमोनमःसर्वे। सर्वेषायपादानांस्थानेयोगपदान्युक्तायमूलमंत्रः। इत्या
चमने। विश्वायविश्वरायेत्यादिस्वाहांतास्तिलमे। विश्वायविश्वेश्वरायेत्यादिनमोयेन
सोमायसोमेश्वरायेत्यादिश्चंद्रपूजायामितिमंत्राउक्ताः। ततोगव्यघृतेनाग्नौवसोर्धाराः कृत्वाहुतेनेति। ततोजातक
र्मनालछेदषष्ठीपूजानामकर्माणिसंक्षेपेणकार्याणि। ततश्चंद्रोदयेरोहिणीयुतंचंद्रंस्थंडिलेप्रतिमायांवानाममंत्रेणसं
पूज्य। शंखेतोयंसमादायसपुष्पकुशचंदनं। जानुभ्यांधरणींगत्वाचंद्रायार्घंनिवेदयेत्। क्षीरोदार्णवसंभूतअत्रिने
त्रसमुद्भव। गृहाणार्घंमयादत्तंरोहिण्यासहितोममेति। ततोज्योत्स्नायाःपतयेतुभ्यंज्योतिषांपतयेनमः। नमस्ते
रोहिणीकांतसुधावासनमोस्तुते। नमोमंडलदीपायक्षीरोदार्णवजन्मने। कलाभिर्वर्धमानायनमश्चंद्रायचाक्षरेतिक्षी
प्रणमेत्। ततोऽनवद्यंवामनं शौरिंवैकुंठं पुरुषोत्तमं। वासुदेवंहृषीकेशंमाधवंमधुसूदनं। वाराहंपुंडरीकाक्षंनृसिं
हं दैत्यसूदनं दामोदरं पद्मनाभंकेशवंगरुडध्वजं गोविंदमच्युतंविष्णुमनंतमपराजितं अधोक्षजंजगद्बीजंसर्गस्थित्यंतकार

णं त्रनादिनिधनंविष्णुंत्रिलोकेशंत्रिविक्रमं।नारायणंचतुर्बाहुंशंखचक्रगदाधरं।पीतांबरधरंविष्णुंवनमालाविभू
षितं।श्रीवत्सांकंजगत्पतिंश्रीकृष्णंश्रीधरंहरिं॥नारणंतुप्रपद्येहंसर्वकामार्थसिद्धये।प्रणमामिसदादेवंवासुदे
वंजगत्पतिमितिमंत्रैः प्रणम्य।त्रोहिमांसर्वलोकेशहरेः संसारसागरात्।त्राहिमांसर्वपापघ्नदुःखशोकार्णवा
हूरेः।दुर्गतांत्रायसेविश्वोयस्मांत्रिसकृत्सकृत्।सोहंदेवातिनिर्वीर्योहिमांशोकसागरात्।त्राहिमांसर्वपापघ्नदुःखशो
कार्णवाहूरेः।निमग्नोहंमायाविज्ञानसागरे।त्राहिमांदेवदेवशलक्ष्मीनान्यास्तिरक्षिता।यादृक्लेयंचकौमारीयौवनंयच्चवा
र्धके।तत्पुण्यंहरिमाप्नोतुपापंहरतुमेधेतिमंत्रैःप्रार्थयेत्। ततस्तोत्रंपठेत्पुराणंश्रवणादिनाजागरणंकृत्वाद्वि
तीयेऽह्निप्रातःकालीननित्यंकृत्वापूर्ववद्देवंपूजयित्वाब्राह्मणान्भोजयित्वातेभ्यस्वर्णधेनुवस्त्रादिभिःकृष्णोःप्रीयतां
मितिवदन्देवंदेवकीदेविवसुदेवादजीजनत्। तोमेस्यब्राह्मणाएतेस्तस्माद्भूयात्मनेनमः।सुजन्मवासुदेवा
यगोब्राह्मणहितायच। शांतिरस्तुशिवंचास्तुइत्यनेनप्रतिमांमुद्वास्यतांब्राह्मणायदत्वापारणंकृत्वाततःसमा

पयेत्। सर्वायसर्वेश्वरायसर्वपतयेसर्वसंभवायगोविंदायनमोनमइतिपारणायां। भूतायभूतपतयेसादिसमा
पनेचमंत्रउच्चार्यापनंचउक्त्वान्नास्तिएवंयथोक्तंतिथौहतंकृत्वापरदिनेपारणंकुर्यात्।त्रुटिवर्तेत्रुट्यां
मथरोहिण्यांनकुर्यात्पारणंक्वचित्। हन्यात्पुरासृतंकर्मउपवासार्जितंफलं। तिथिरष्टगुणंप्रोक्तंनक्षत्रंचतुर्गुणं तिथिभा
तस्मात्प्रयत्नेकुर्यात्तिथिभांतेचपारणमितिस्थं जन्माष्टमीपरंनान्यत्र तच्चदिवसउपर्यंतेपारणमितिमुख्यकल्पः।
तत्रयदितिथिनक्षत्रयोरन्यतरस्यवांतोरात्रौभवतितदातद्रात्रौनकुर्यात्द्विवसेवैवोपवासपुरिवापारणमिष्यते।
अन्यथापुण्यानिस्याद्दतेधारणपोषणमितित्रह्मवैवर्तेनिषेधात्। अन्यतिथ्यागमेरात्रौतामससंतेजसेदिवा।तामसेपारणंकुर्वन्नृता
मसींगतिमश्नुते। इतिगरुडपुराणात्। यत्तुकेनचिदुक्तं।तिथिनक्षत्रयोगात्रिवापारणस्यासंभवेरात्रावपिकार्यं।तदुक्तंमाधवीये
स्कांदे। तिथ्यर्क्षयोर्यदाछेदोनक्षत्रांतमथापिवा।अर्धरात्रेथवाकुर्यात्पारणंत्वपरेहनीति।ब्रह्मांडपुराणेपि।नरात्रौपारणं
कुर्यात्क्वचेत्तैरात्रिणाव्रतात्। तन्निरस्यतितत्कुर्याद्भुंजयित्वामहानिशामिति। पूर्वोदाहृतंतुसामान्यवाक्यंयंजन्माष्ट

मीपारणाति रिक्तपारणमूमिति तत्रब्रह्मांडीयवचनेतावदपिवक्तंतपारणमितियत्स्यार्थेसांगनोभयथानारदः प्रीतयेएवं
चतुन्यर्थलेसंभविनसामान्यवचनबाधकलेमेतस्यपूज्यते यदपितिथ्यक्षयेयोरितिवचनं तत्रापिकंपदमेकत्रान्वितमन्यत्रपि
नवलवदनूपपत्तानान्विता निन्यायात्। अर्धरात्रपदोभयांतस्तदावत्वनांतरवाधितेदिनएवपारणंकुर्यान्नत्वर्धरात्रेपारण
मित्येवंपरमिति। न्यायश्चायंतृतीयेसिद्धः। तथाचमसभन्योश्वमसामूश्वमसीनो भक्षयंती। अथैतस्यहरियोजनस्यस
र्वेएवलिप्संतइत्यत्रचमसीपदस्यहरियोजनान्वयानभ्युपगमात्। किंच त्वयापिहिपरेह्निसत्यावीवक्षांगिक्रियतए
व अन्यथातृतीयदिनेपारणापातिः यदप्यूमाधवेनोक्तं अर्धरात्रशब्देनरात्रिमात्रंगृह्यतइति तदपिप्राणाभावे
नैवापास्तां यद्यपिवक्षातदादिनस्यैवंग्रहणाच्चिसात्। तस्मात्सम्पूर्णएवपक्षः श्रेयान्। तत्रशुक्लउभयातेश
ुक्लस्त्वन्यतरांते। तिथ्यंतेशोत्सवांतेवाप्रतिकुर्वीतपारणमितिकालादर्शादिनिबंधवचनात्। उत्सवांतेजागरायुत्स
वांते। भाद्रशुक्लाष्टमीहूर्वाच्छुच्यते भविष्ये शुक्लाष्टमीतिथिर्यातुमाक्षिभाद्रपदेभवेत्। दूर्वाष्टमीतुसाज्ञेया नोत्तरा

साविधीयेतइति स्यंचपूर्वविधा। तदुक्तंस्कंदेन श्रावणीदुर्गनवमीदूर्वाचैवकुताष्टमी। पूर्वविधापूर्वकर्तव्याशिवरा
त्रिर्बलेदिनमिति। अत्रस्त्रीणामेवाधिकारान्पुंसां यानेपूजयतेदूर्वामोदादिरुयथाविधि। जन्मानित्रिनिवेधमवाप्नुयात्
नात्रसंशयः तस्मात्संपूजनीयासाप्रतिवर्षंविधूजनैरितिचंद्रप्रकाशेपुराणसमुच्चये करणेवैधव्यरूपानिष्टश्रुतेः। अत
एवनित्यमवादांइदंचव्रतंभाद्रशुक्लेगस्योदयसंभावनायांभाद्रशुक्लाष्टम्यांकार्यं शुक्लेभाद्रपदमासिदूर्वासंज्ञातथा
ष्टमी। सिंहार्केएवकर्तव्यानकन्यार्केकदाचन। सिंहस्थेचोत्तरासूर्येनुदितेमुनिसत्तमा। इतिगोविंदार्णवस्कांदात्। अ
त्रकृत्यमुक्तंमदनपारिजातेभविष्यपुराणे। शुचौदेशेप्रजातायांदुर्वायांबालशोत्तमा। स्थाप्यलिंगततोगंधैःपुष्पै
र्धूपैःसमर्चयेत्। दध्यक्षतैर्दीपजात्रैवेद्यमर्घ्यंदद्यात्त्रिलोचने। दूर्वाशमीभ्यांविधिवत्पूजयेच्छूलपाणयुता। तत्रमंत्रः त्वं
दूर्वेऽमृतजन्मासिवंदितासिसुरासुरैः। सौभाग्यंसंततिंदेहिसर्वकार्यकरीभव। तथाशारवाप्रश्नारवाम्यांसिद्धिस्तत्रासि।
महीतले। तथैवममसंतानंदेहिनित्यंनमोनमः। भक्ष्यनियमोपिभविष्ये अनग्निपक्वमश्नीयादन्नंदधिफलंतथा।

अक्षारलवणांत्रल नाश्नीयान्मधुनान्वितमिति॥ इदंचज्येष्ठामूलशून्यरोहिणीमुहूर्तेव्यापिनीयाह्या। मुहूर्तेरोहिण्यष्टम्यां
हूर्वावायदिवापरा। हूर्वाष्टमीतुसाकार्याज्येष्ठामूलंचवर्जयेत्। इतिपुराणसमुच्चयात्। दिनद्वयेरोहिणेज्येष्ठामूलंयोगेत
दभावेचापूर्वैव। श्रावणीदुर्गनवमीतिपूर्वोक्तवाक्यात्। अत्रैवज्येष्ठापूजनंलेगे॥ कन्यार्केयाज्येष्ठर्क्षसंयुते। यस्मिन्
कस्मिन्दिनेकुर्याज्येष्ठायाःपरपूजनमितिस्कांदोक्तेश्चज्येष्ठायोगवशेनयाह्या। नक्षत्रयोगभावेतुपरैव। पूर्वद्युरात्रौनक्ष
त्रयोगेतुपूर्वैव॥ तथाच्छतत्रैव॥ नवमीसंहिताकार्याष्टमीनात्रसंशयः॥ मासिभाद्रपदेशुक्लेपक्षेज्येष्ठर्क्षसंयुता रात्रिर्यस्मि
न्दिनेकुर्याज्येष्ठायाःपरिपूजनमितितत्रैव। यस्मिन्दिनेभवेज्येष्ठामध्याह्नादूर्ध्वमप्यणु। तस्मिन्विष्णुंपूजयेच्चपुनश्चेत्पूर्व
वासरेति। महालक्ष्मीयात्रास्यामेवोक्ताकाशीखंडे। महालक्ष्म्याष्टमीप्राप्यतत्रयाकृतान्हणा। संपूजितेहविधिवत्सयत्नो ३५
सघनमुंचति। व्रतंतस्येतमाख्याय्यचिनकृष्णाष्टमीपर्यंतंपोडशदिनानिप्रसंख्यायांकुर्यादितिशिष्टः अत्रव्रतमुक्तंपुराण
समुच्चये। श्रियोर्चनेभाद्रपदेसिताष्टमीमारभ्यकन्यागतेवसूर्ये॥ समापयेत्तत्रतियोचयावत्पूर्यस्तुपूर्वार्धगतोयुवत्या

इत्वायंनियमः षोडशदिवसैकैस्मत्प्रयोगतद्वितीयादिवर्षेतुनियमः एतच्चार्धरात्रातिक्रमेवर्तिन्यमेष्टम्यांकार्यं। अर्धरात्र
मतिक्रम्यवर्ततेयोत्तरातिथिः तदातस्यांतिथौकार्यंमहालक्ष्मीव्रतंसेदितिचंद्रप्रकाशस्मृत्यंतरात्। अश्विनशुक्लाष्टमी
महाष्टमीरुच्यते। तथाच्छब्रह्मपुराणे। तत्राष्टम्यांसदाकाली दक्षयज्ञविनाशिनी। वाराहीतामहालक्ष्मीयोगिनीकोटिसेविता॥ तत्राश्विनशुक्लपक्षे। अतोत्रपूजनीयासातस्मिन्नरुनिमानवैरिति। इयंचाष्टमीनवमीयुक्तायाह्या। त
थाचदेवीपुराणे। सप्तमीवेधसंयुक्तायेः कृतातुमहाष्टमी। पुत्रदारधनैर्हीनाभ्रमंतीरुक्षिशाचवदिति मदनरत्ने
संग्रहेपि। शारन्महाष्टमीपूज्यानवमीसंयुतासदा। सप्तमीसंयुतानित्यंशोकसंतापकारिणी। अंभसेनसप्तमीयुक्तापूजि
तात्रमहाष्टमी। इंद्रेणनिहतोजंभस्तस्मादानवपुंगवः॥ तस्मात्सर्वप्रयत्नेनसप्तमीसहिताष्टमी। वर्जयित्वाप्रयत्नेन
मुनिभिः शुभकांक्षिभिः सप्तमीकलयायत्रपरतश्चाष्टमीभवेत्। तेनशल्येभिसंपोक्तंपुत्रक्षयकरंपरं। तथा। पुत्रान्हं
तिपशून्हंतिहंतिराष्ट्रंसराजकं। हंतिजातानजातांश्चसप्तमीसहिताष्टमीति। ब्रह्मवैवर्ते शुक्लपक्षेष्टमीचैवशुक्ल

क्ष्चतुर्दश्यौ पूर्वविद्धानकर्तव्याकर्तव्यापरसंयुतारति। वसुरंध्रयोरितियुग्मवचनं अत्रत्रिमुहूर्तव्यापिनीसप्तमीवर्जन
प्रयोजकं तंत्रिमुहूर्त्तैव तथापुराणे सप्तमीशल्पसंयुक्तावर्जनीयासदाष्टमी श्लोकापिसातिथिः पुण्याय
स्यांसूर्योदयोप्यवेदिति श्लोकास्वल्पाकलाकाष्ठादिमात्रापीत्यर्थः इयमेवभौमयुक्तालाभेतुसप्तमीयुतैवकार्या
तत्सराण्यवसप्तम्यापियुताकार्यामूलेनापिविशेषतइत्यादीनिवचनानि नवरात्रात्रौत्रिरात्रायुक्तंदेवीपुराणे
नवरात्रव्रतेशक्तस्त्रिरात्रंचैकरात्रकं व्रतंचरितियोप्यक्तस्तस्मेदास्यामिवांछितमिति केवलाष्टम्यैवासस्तुपुत्रवता
नकार्यः उपवासंमहाष्टम्यांपुत्रवान्नसमाचरेत् तथायथावाप्तात्मावत्तीदेवींप्रपूजयेदितिकालिकापुराणात् मा
र्गशीर्षेशुक्लाष्टम्यांकात्यायनीखंडेकात्यायनीवासनिर्विघ्नतार्थंकालभैरवप्रपूजोक्ता कृत्वाचविधिवत्पूजांमहासंभारविस्तरैः ३५
नरोमार्गासिताष्टम्यां वार्षिकंविघ्नमुत्सृजेदिति तत्रैव तीर्थकालोदकंस्नात्वाशुक्लातर्पणसत्वरः विलोक्यकालपुरा
जानंनिरयादुद्धरात्मनइति उपोषणमप्युक्तमस्यामेवकात्यायनीखंडे मार्गशीर्षासिताष्टम्यांकालभैरवसंनिधौ उपोष्य

जागरंकुर्वन्सर्वपापैःप्रमुच्यते अत्रोपोषणांगतयार्घ्यदानमपिकार्यमितिशिवरहस्यज्ञेयं अत्रोपवासजागरणयोःप्रधा
नयोरहोरात्रसाध्यत्वेनाहोरात्रयुक्ताष्टमीग्राह्या अहोरात्रव्रतंयच्च एकमुक्तितिथौगतं तस्यामुभययोगिन्यामाचरेत
व्रतंव्रतीतिस्मृतेः यदातु पूर्वदिनेसायाह्नप्रदोषेतुल्यातदापूर्वैव कृद्व्रंतुसर्वेषुकर्तव्यासंमुखीतिथिरिति। अत्र
वैयर्थात् यत्तुकश्चिद्दिनसायाह्नेप्रदोषेतुल्यातदापोषणस्यांगभूतमर्घ्यदानामितिशिवरहस्यात् उपोषणेषुसर्वे
षुकर्तव्यासंपोषणमेवप्रधानंनजागरणमिति। अर्घ्यदानस्योपोषणांगत्वेपिजागरणेतत्वायोगात् यदपिमध्याह्ने
संस्थितेरवावित्यत्रकृष्णतदोयरूपादानवान्मतःश्रीकालभैरवः अविरासीत्ततोकान्भीषयन्नरिवलानपिइतिशि
वरहस्येकालभैरवापिभावात्तद्व्यापिनीग्राह्येतिकश्चित्तदपितुच्छं शिवरहस्येमध्याह्नोक्तंस्नात्वासरंप्रापु
देवालिल्यादिसाधनाइत्यादिनाभूपःकर्मकलापमुक्त्वाभैरवापिसर्वोचोक्तानुपदमेवसूर्योपस्तमुपागादित्यत्रं
तत्रमध्याह्नसायाह्नवाविशेषोवा निश्चेयात् अस्तुवामध्याह्न आविशेषेसंथापितत्कालिकग्राह्यतायांमानाभावः

नद्याविर्भावकालीकियाद्येतिवाक्यमस्तिकिंचित् जन्माष्टम्यादौपूजाख्यकर्मकालत्वेननिर्णीथव्यापिनीग्राह्येऽहनि नज
न्मकालेनवेतिसंक्षेपः माघशुक्लाष्टम्यांभीष्मतर्पणमंत्रः श्राद्धंचोक्तंहेमाद्रौपाद्मे माघमासिसिताष्टम्यांसलिलंभी
ष्मतर्पणं श्राद्धंचेन्नराःकुर्युस्तेस्युःसंततिभागिनेति तर्पणमंत्रस्तुभारते भीष्मःशांतनवोवीरःसत्यवादीजितेंद्रियः
आभिरद्भिरवाप्नोतुपुत्रपौत्रोचितांक्रियां वैयाघ्रपद्यगोत्राय सांकृतप्रवराय च अपुत्रायददाम्येतज्जलंभीष्मायतर्पणं
वसूनामवतारायशंतनोरात्मजायच अर्घ्यंददामिभीष्मायआजन्मब्रह्मचारिणे पाद्यं ब्राह्मणाद्वैश्ययोवर्णादस्तु
भीष्मायनोजलं संवत्सरकृतंतेषांपुण्यंनश्यतिसत्तमइति इदंचजीवत्पितृकेपिकुर्यात् निषेधाप्तिवात् यत्तु स
पितृपितृकस्येषुणाधिकारःकथंचनेतिनिषेधसापित्र्यकर्मपरतयादिक् इत्यष्टमी: अथनवमीसानुपूर्वी. यसु
रंध्रयोरितियुग्मवचनात् ब्रह्मवैवर्तेपि अष्टम्यानवमीविद्धाकर्तव्याफलकांक्षिभिः नकुर्यान्नवमीतादृक्
दशमीयुक्तचंदोन इतिचैत्रशुक्लनवमीरामनवमीसापरविद्धामध्याह्नव्यापिनीग्राह्या तदुक्तंअगस्त्यसंहितायां

DR. BHAU DAJI MEMORIAL

चैत्रशुक्लेतुनवमीपुनर्वस्वृक्षयुतायदिसैवमध्याह्नयोगेनमहापुण्यतमाभवेदिति नवमीचाष्टमीविद्धात्याज्यविष्णुपराय
णैः उपोषणंनवम्याचदशम्योपारणाभवेदितिवचनाच्च तत्रैव चैत्रमासेनवम्यांतुजातोरामःस्वयंहरिः पुनर्वस्व
क्षसंयुक्तासातिथिःसर्वकामदा श्रीरामनवमीप्रोक्तकोटिसूर्यग्रहाधिका केवलापिसदापाप्यानवमीत्रयसंयुतात्
तस्मात्सर्वात्मनासर्वैःकार्यंवैनवमीव्रतं उपोषणंजागरणंपित्र्यंतुदित्र्यतर्पणं तस्मिन्दिनेतुकर्तव्यंब्रह्मपाप्तिमभीप्सु
भिः अत्रपूर्वदिनएवमध्याह्नव्यापिनीचेत्पूर्वा तदिनद्वयेतद्व्याप्तावव्याप्तौवैकदेशसमव्याप्तौचनक्षत्रचेत्पूर्वीय
थोत्तरेति अष्टमीविद्धनिषेधादिति तत्रैव पेसुरामनवम्यांतुभुंक्तेमोहाद्विमूढधीः कुंभीपाकेषुघोरेषुपचयंतेना
त्रसंशयः इत्यकरणेपत्यवायश्रुतेर्नित्यंफलश्रुतेश्चकाम्यं नरामनवमीव्रतं यत्तुतत्रुक्लानामेवनित्यमिति तत्रसंको
चेमानाभावात् जन्माष्टमीशिवरात्र्यादिव्रतेपितथापत्तेः अथव्रतपद्धतिः व्रतपूर्वदिनेसायंदंतधावनं व्रतदिनेच
प्रातःसूर्यःसोमोयमः कालःसंध्येभूतान्यदाक्षया पवनोदिक्पतिर्भूमिराकाशंखचरामराः ब्राह्म्यंत्रासनमास्थाय

कल्पध्रुमिहसन्निधिमित्यक्त्वाफलपुष्पाक्षतसहितजलपूर्णताम्रपात्रंगृहीत्वामासाद्युलिख्यपापक्षयकामोवाश्री
रामप्रीत्यर्थेश्रीरामनवमीव्रतमहंकरिष्ये उपोष्यनवमीत्वयेयामेघदृसुराघव तेनप्रीतोभवस्वंमोः संसारात्राहि
मांदेत्यक्त्वापात्रस्थंजलंक्षिपेत् ततः शुक्तितोरौमीरामप्रतिमांकृत्वान्युत्तारणकर्वेकंकपोलौस्पृष्ट्वामूलमंत्रंप्रणवा
दिचतुर्थ्यंतंनामरामायदेवत्वसंख्यायैस्वाहेतिचमंत्रंपठन् प्राणप्रतिष्ठांकुर्यात् ततः कोमलांगंविशालाक्षंइंदुनी
लसमप्रभं दक्षिणांगेदशरथंपुत्रावेक्षणतत्परं दृष्ठतोलक्ष्मणंदेवंसछत्रंकनकप्रभं पार्श्वेभरतशत्रुघ्नौतालवृंत
करावुभौ अग्रेव्यग्रंहनुमंतंरामानुग्रहकांक्षिणामितिध्यात्वाषट्कोणमध्येपूजयेत् श्रीरामप्रतिमासमीपेषट्कोणम
ध्येकौशिल्यांदशरथंचपूजयेत् षट्कोणेषुरांहृदयायनमः शीं शिरसेस्वाहा हूं शिखायैवषट् रैंकवचायहुं रौने
त्रत्रयायैवषट् रः अस्त्रायफट् इतिहृदयादिनिषट् षट्कोणबाह्येअष्टदलकमलदलमूलेहनूमंतंसुग्रीवंभरतंवि
भीषणंलक्ष्मणंमंगदंशत्रुघ्नंजांबवंतंचदलमध्येषुधृतिंजयंतंविजयंसुराष्ट्रंराष्ट्रवर्धनं अकोपंधर्मपालंसुमंत्रंचदला

ग्रेषुइंद्रंअग्नियमंनिर्ऋतिंवरुणंवायुंकुबेरंईशानंचाष्टौलोकपालान् तदग्रेवज्रंशक्तिंदंडंखड्गंपाशंअंकुशंगदांशूलं
चेतितेषामायुधानिचपूजयेत् श्रीरामपूजायामूलमंत्रः वैदिकोवातेत्रवप्रणवादिचतुर्थ्यंतंनमोतंनामवामंत्रः इंद्रोग्नि
श्चयमश्चैवनैर्ऋतोवरुणोनिलः कुबेरईशानोब्रह्मादिक्पालाः स्नापयंतुतेइतिस्नाने रामस्यजननीचासीरामात्मक
मिदंजगत् अतस्त्वांपूजयिष्यामिलोकमातर्नमोस्तुतेति कौशल्यापूजायां ॐनमोदशरथायेतिदशरथपूजायांम
तेरेषांमूलमंत्राः प्रणवादिचतुर्थ्यंतंनमोतंनामानिवा उच्चस्थेषुग्रहेषुपंचकेपुरुषैरासैरोनवम्यांतिथौलग्नेकर्कटकेपु
नर्वसुदिनेमेषगतेपुषणि निर्दग्धुंनिखिलाः पलात्रासमिधोमुध्यादयोध्यारणेराविर्भूतमभूत्पूर्वंविश्वयंयत्किंचिदेकं
महोतिमध्याद्भजन्मभावनावाच्यादिवदनंचततः पुष्पांजलिपूर्वंफलपुष्पांबुसंपूर्णंगृहीत्वारोरवभुजमंत्रशोकरलकु
रुमैर्युक्तंचतुलसिदलैः दशाननवधार्थायधर्मसंस्थापनायच दानवानांविनाशायदेवानांनिधनायच परित्राणाय
साधूनांजातोरामस्त्वयंहरिः गृह्णार्घ्यंमयादत्तंश्रीलक्ष्मिः सहितोममेतिमंत्रेणार्घ्यंदद्यात् पुष्पांजलिंपुनर्दत्वाया

मेयामेत्यतंद्रितः पूजयेद्विधिवद्कृत्वादिवारात्रिंनयेद्बुधइति ततस्तोत्रपाठपुराणश्रवणादिभिःरात्रौजागरणंकृत्वा
द्वितीयदिनेप्रातःकालिकंनित्यंकृत्वापूर्ववद्देवश्रीरामंपरिस्त्वादिदेवताश्चसंपूज्यविप्रान्संभोज्यश्रीरामोमेप्रीयता मि
तिवाच्यःसुवर्णधेनुवस्त्रादिदत्वाक्षतिमासुद्वास्यदिग्वायदत्वापारणंकृत्वाव्रतंसमापयेत् आश्विनशुक्लनवमीमारभ्य
नवमीरुच्यते तदुक्तंपतापमार्तंडेलैंगे दुर्गापूजासुनवमीमूलानक्षत्रयान्विता महतिकीर्तितातस्यांदुर्गोमहिषम
र्दिनीमिति पूजयेदितिशेषः तत्रपूर्वविधायाद्ययुग्मवचनात् द्वेदृश्युन्नेपि श्रावणीदुर्गनवमीदुर्वाचैवकृताश्वनी
पूर्वविद्धापकर्तव्याशिवरात्रिर्बलेदिनमिति अस्यामेवदुर्गापूजनहोमबलिदानादिकार्यमितिराजमार्तंडे नवम्यांचजपं
होमंसमाप्यविधिवद्बलिमितिबल्लवेवर्तेपि अत्रापराह्णिकेकालेबलिदानंपठ्यतेदत्तामीवजयेत्तत्रनात्रकार्याविचा
रणेति नवम्यामुपक्रम्यनवम्यामेवसमापयेत् गौडनिबंधेप्येवं कोचिदष्टम्यामारभ्यनवम्यांसमापयंति तत्रमूलं
शिष्टाचारएव अत्रउमरतंत्रेविशेषः सायंसंसर्पिषायुक्तंतिलैःशुक्लैर्विमिश्रितं होमयेद्विधिवद्वह्न्यादशांशेनतत्पो

तम रुद्राध्यायेयथाहोममंत्रेणाननसाधयेत् रुद्रयामेऽपि प्रधानद्रव्यमुद्दिष्टंपायसान्नंतिलास्तथा किंशुकैःसर्षपैः
पूगैर्लाजैर्दूर्वांकुरैरापि येवैर्वाश्रीःफलैर्दिव्यैर्नानाविधफलैरपि रक्तचंदनखंडैश्चगुग्गुलैश्चमनोहरैः प्रतिश्लोकंच
जुहुयात्सर्वद्रव्याणिक्रममादिति यत्तुकेचिदष्टम्यांजागरंकुर्यान्नवम्यांघातयेत्तथा दशम्यांचविसर्गःस्याद्विषेकश्च
माधवइतिरुद्रयामलात् नवम्यांचविशालाक्षकार्याहोमादिकार्याःक्रियाः पारणंचप्रकुर्वीत देवीपूजनपूर्वकं दशम्यो
मिश्रितायत्रपारणेनवमीक्षयेत् सर्वजन्मकृतंपुण्यंतत्क्षणादेवनश्यति तथा योमोहात्पारणंकुर्यादशमेदिवसेविभो
नवम्यांपारितादेविकुलद्वयंविनश्यति नदशम्यांपारितादेविकुलनाशंकरोतिवै तस्मात्तुपारणंकुर्यान्नवम्यांवसुधा
धिपेतिदेविपुराणादश्च नवम्यामेवनवरात्रपारणमित्याहु तन्न येवंचविंध्यवासिन्यांनवरात्रोपवासतः एकभक्तेन
नक्तेनस्वयाक्तायाचितेनच अथवायाचनक्तैश्चनवरात्रंसमापयेदितिभविष्यादिक्तोक्तिरुपवासादिषु विहितस्यनवतीथ्या
धिकरणकत्वस्यबाधप्रसक्तेः अस्मिन्वाक्यैकवाक्यत्वादिग्वदसमभिव्याहारेणनवरात्रंसमापयेदितिनामधेयांतरसत्वा

ञनवतिथिरूपगुणाविधिरेवयुक्तोनवरात्रोपवासइतिनामधेयं नवमीपारणपारणविधायकानिदशमीनिषेधकानि
चपूर्वोक्तानिवचांसितुमहानिबंधादिष्टदर्शनाशायोनिर्मूल्यान्येव समूलत्वेपितेषांपूर्वेद्युरष्टमीविद्धत्वेननवमीयु
क्तउपवासेजातेपरेद्युश्चावद्भिरष्टकिंचिन्नवमीसत्वेनवम्येतः पारणविधायकत्वं नतुप्रोषोपवासवाधकत्वं एवंच
सर्वेषामुपवासानांप्रातरेवहिपारणंइतिवचोविगतावद्भिरष्टनवम्यंतः पारणस्योपोष्यतिथ्यंतपारणविधिनाबाधित
स्यप्रतिप्रश्नाविधित्वेनैषांलाघवांश्रन्यथाप्राप्तविधितयागौरवं अतश्चदशम्यांपारणंनकुर्यामित्येतेषां अनुवा
दकत्वेमेवननिषेधकत्वंविस्तरश्चात्रतातात्चरणहृतदैवनिर्णयेबोध्यः पारणंतुसूतकेपिकार्यंतदुक्तंरुद्रयामले सूत ५
केपारणंकुर्यान्नवम्यांहोमपूर्वकं एवंस्त्रीभिर्विशेषोदर्शनमध्येपिकार्यं तदाहसएवतः प्रारब्धदीर्घतपसांनारीणां ३९
यद्रजोभवेत् नतत्रापिविरोधस्याद्उपरोधः कदाचन एतच्चसधवापरंज्ञेयं विधवायस्तुत्रिरात्रमध्येभोजननिषे
धादितिकेचित् तन्न निषेधस्यरागप्राप्तभोजगोचरत्वेनवैधव्यपारणयोगात् वस्तुतस्तु रजस्वलायास्त्रिरात्र

मध्येभोजननिषेधएवस्वपुष्पायमानइतिदिक् इतिनवमीनिर्णयः अथदशमी सातुहस्तापूर्वाशुक्लोत्तराग्राह्या
तदाहमाधवः हस्तोपूर्वोत्तराशुक्लादशम्येवंव्यवस्थितेति उपवासेतुसर्वोपिसर्वमतेपूर्वविद्धैव संपूर्णादशमीकार्यापिया
पूर्वयाथा युक्तानदूषितायस्मादितिसासर्वतोमुत्तंगिरसमतेः अयंचविकल्पोव्यवस्थितः शुक्लपक्षेतिथिग्राह्यायस्मा
मत्स्यादित्तोरविः हस्तपक्षेतिथियाह्यायस्यामस्तमितोरविरितिवचोत्तरात् माधवोप्येवं यत्तुहेमाद्रिर्दिनद्वयेकर्मका
लव्याप्त्यभावेरिक्तेकाविकल्पइत्याह तन्न शास्त्रेतावित्रपक्षोसंभवेरिक्तत्वायोगात् नागविद्धातुयापक्षी त्रिवसि
द्धाचसप्तमीदशम्येवएकादशीविद्धानोपोष्यासाकथंचनेति त्रिवरहस्येतु यत्तुप्रतापमार्तंडस्कंदे दशमीचैवकोप
सदुर्गेद्विजसत्तमेति दत्तदप्युपवासपरं ज्येष्ठशुक्लदशमीदशहरा ज्येष्ठमासिसितपक्षेदशमीहस्तसंयुता हरते
दशपापानितस्मादशहरास्मृता तस्यांस्नानंप्रकुर्वीतदानंचैवविशेषतइतिहेमाद्रौब्राह्मोक्तेः दशपापानिचाहमनुः
पारुष्यमनृतंचैवपैशून्यंचापिसर्वशः असंबद्धप्रलापश्चवाङ्मयंस्याच्चतुर्विधं अदत्तानामुपादानंहिंसाचैवविधा

नतः परदारोपसेवाचकायिकंत्रिविधंस्मृतं ॥ परद्रव्येष्वभिध्यानंमनसानिष्टचिंतनं वितथाभिनयेनाश्च त्रिविधंकर्ममा
नसमितिस्कांदेपि ज्येष्ठमासिसितेपक्षेदशम्यांबुधहस्तयोः गरानंदव्यतिपातकन्याचंद्रेदृषरवौ ॥ दशयोगेनरस्ना
त्वासर्वपापैः प्रमुच्यतइतिपंचयोगविन्नेषवशात्पूर्वापरायाह्या काशीखंडे दशाश्वमेधिकेस्नात्वामुच्यतेसर्वपाप
कैः लिंगदशाश्वमेधेशदृष्ट्वादशहरातिथौ दशजन्मार्जितपापैः स्यज्यतेनात्रसंशयः स्कांदे यांकांचित्सारितंपा
प्यदद्याद्धांतिलोदकं मुच्यतेदशभिःपापैः समहापातकोपमैः यदाज्येष्ठमलमासोभवतितदामलमासएक
कार्ये दशहरासुनाक्षत्रंचतुर्थ्यांपियुगादिषु उपाकर्ममहापध्याह्येतदुक्तंदृषादितहेमाद्रौकृष्णशृंगोक्तेः आश्वि
नशुक्लदशमीविनयादशमी स्मृच्येत सानक्षत्रोदयव्यापिनीग्राह्या तदुक्तंरत्नकोशे ईषत्संध्यामतिक्रांतः ४०
किंचिदुद्गिन्नतारकाः विजयोनामकालोयंसर्वकार्यार्थसाधकेति चिंतामणावपि आश्विनस्यसितेपक्षेद
शम्यांतारकोदये सकालोविजयोज्ञेयः सर्वकामार्थसिद्धये इत्युक्तेश्चास्तोदयौ विद्धा यापूर्णानवमीयुक्ता

तस्यांपूजापराजिता क्षेमार्थंविजयार्थंचपूर्वोक्तविधिनानरैः नवमीद्योपयुक्तायांदशम्यामपराजिता ददातिविजयंदेविपूजि
तांजयवर्धिनी एकादश्यांनकुर्वीतपूजनंचापराजितेति स्कांदोक्तं तत्रैव दशमीयःसमुल्लंघ्यप्रस्थानंकुरुतेनरः तस्ये
संवत्सरंराज्येनकापिविजयोभवेदिति दिनद्वयेतारकोदयकालाप्तावपरह्णे एकादशीमुहूर्त्तेयात्राकार्याऽश्वि
नस्यसितेपक्षेसर्वराशिषु सायंकालेशुभायात्रादिवाविजयलक्षणे एकादशीमुहूर्त्तोयोविजयःपरिकीर्तितः तस्मि
त्सर्वैर्विधातव्यायात्राविजयकांक्षिणेतिभगवतोक्तेः पूर्वदिनेएकादशमुहूर्त्तव्याप्तभावेपिश्रवणायोगश्चेत्तदैवयात्रा
उदयेदशमीकिंचित्संपूर्णैकादशीयदि श्रवणर्क्षंयदाकालेसातिथिर्विजयाभवेत् इतिमदनरत्नोक्तेः श्रवणर्क्षे
तुपूर्णायांकाकुत्स्थःप्रस्थितोयतः उल्लघयेयुःसीमानंताद्दिनर्क्षंततोनराइतिभविष्योक्तश्च अत्रहस्तंभविष्ये
सामिसलक्षणोपेतांईशानायांप्रतिष्ठितां संप्रार्थ्यतांचसंपूज्यक्षीणानीसुमुखोभवेत् रामीरामयतेपापंश्रा
मीलोहितपंडक धारयच्यर्जुनास्त्रीणारामसंवाददायिनि करिष्यमाणयात्रायांयथाकालंसुखंमम तत्रनिर्वि

घ्रकत्रीलंभवश्रीरामभूजिते यहीत्वासाक्षतामाङ्गिरामीमूलगतामतं दितवादित्रनिर्घोषैरानयेत्स्वगृहंप्रति। ततो
भूषणवस्त्रादिधारयेत्स्वजनैःसहेतिदिक्। इतिदर्शनिर्णयः अथैकादशीतत्रोपवासोनित्यकाम्यश्च तत्राधम
रुसनत्कुमारः नकरोतिस्त्रियोमूढ एकादश्यामुपोषणं सनरोनरकंयातिरौरवंतमसावृतमितिगारुडे उपोष्यका
दशीनित्यंपक्षयोरुभयोरपीतिकाम्यस्तुकौर्मेयदाछेद्विसुसायुज्यंश्रीयंसंततिमात्मनः एकादश्यांनभुंजीतपक्ष
योरुभयोरपीति अष्टवर्षाधिकस्यापनयनोत्तरत्वस्योपलक्षणं। अपिवावेदतुल्यत्वादुपायेनवर्त्तेरन्नितिपक्षे
स्थापितत्वात् एतच्चगृहस्थव्यतिरिक्तपरंतदुक्तंकौर्म्मे। एकादश्यांनभुंजीतपक्षयोरुभयोरपि वानस्पत्यस्य
धर्मोयंशुक्लमवसदाग्ह्णी। भविष्येपि। एकादश्यांनभुंजीतपक्षयोरुभयोरपि ब्रह्मचारीनचारीचशुक्लमवसदा
ग्ह्णीति नारीविधवा ब्रह्मचारीसाहचर्यात् सधवायास्तुपक्षद्वयेपिनिषेधः पत्योजीवतियानारीउपोष्यव्रतचारिणी
आयुष्यंहरतेभर्तुःसानारीनरकंव्रजेदितिविष्णूक्तः नास्तिस्त्रीणांपृथक्यज्ञोनव्रतंनापुपोषणं पतिंशुश्रूषतेयातु

DR. BHAU DAJI MEMORIAL

तनस्वर्गंमहीयतइतिमन्वृक्तेः तथा यदेवपोष्यंचपित्रादिकेप्यादृतोभ्यर्चनसत्क्रियांच। तस्ययद्दृसाफलनान्यचिंता
नारीपुंश्चलीभर्तुःशुश्रूषयैवेति भर्त्ताज्ञेयातुसाधवायास्त्वप्यधिकारोस्त्येव भार्यापत्यूर्मतेनेवव्रतादीनांचरेत्संदृतिकाल्पा
यनोक्तेः चातुर्मास्यांतर्गतातुरुक्लापिगृहीणोपोष्या शयनीबोधिनीमध्येयारुक्लैकादशीभवेत्। सैवोपोष्यागृहस्थनना
न्यारुक्लाकदाचनेतिपाद्मात्। एतच्चापुत्रगृहीविषयं पुत्रवतस्त्वत्रापिनिषेधः संक्रांत्यामुपवासंचरुक्लैकादशीवावा
सरे। चंद्रसूर्यग्रहेचैवनकुर्यात्पुत्रवान्यतीतिनारदोक्तेः आदित्यहनिसंक्रांतौव्यतीपातेचंद्रसूर्ययोः पारणंचोपवासं
चनकुर्यात्पुत्रवान्यती। तत्पयुक्तोपवासस्यनिषेधोयमुदाहृतः पयुक्तांतर्युक्तस्य। नविधिर्ननिषेधनमितिजैमिनिस्मृते
स्मृत्यंतरेपि विधवायावनस्थस्ययतेश्चैकादशीयुयोः। उपवासोगृहस्थस्यशुक्लायामेनपुत्रिणइतिहेमाद्रिरप्येवं का
म्यायांरुक्लापवादमाहनारदः। पुत्रवांश्चसभार्योश्चबंधुयुक्तस्तथैवच। उभयोःपक्षयोःकाम्यव्रतंकुर्यात्तुवैष्णवमि
ति वैष्णवैस्तुरुक्लाप्युपोष्यासरुसर्व। नित्यंभक्तिसमायुक्तैर्नरोविष्णुपरायणैः। पक्षेपक्षेचकर्तव्यंएकादश्यामुपोषणं॥

सपुत्रश्चसभार्यश्चसजनोभक्तिसंयुतः॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपि॥ तत्रैकादशीद्वेधा॥ शुद्धादशमीविद्धाच
त्राद्यागरुडेउदयात्प्राक्यदाविप्रमुहूर्तद्वयसंयुता॥ संपूर्णैकादशीज्ञेयातत्रैवोपवसेद्बुधः॥ वैष्णवीगृहस्थः॥ स्मार्त
विषयेतुतत्रैवः॥ आदित्योदयवेलायामारभ्यषष्टिनाडिका॥ संपूर्णैकादशीनामकार्योधर्मफलेप्सुभीरिति॥ दशमीविद्धापि द्वे
धा॥ अरुणोदयेसूर्योदयेच॥ दशमीसत्वेन॥ तत्राद्याभविष्यपुराणे॥ अरुणोदयवेलेतुदशमीयदिदृश्यते॥ साविद्धैकादशीतत्रपापमूलेउपोषणं॥ अरुणोदयवेलायांदशमागंधोप्सवेद्यदि॥ दुष्टंतत्तुप्रयत्नेनवर्जनीयानराधिप॥ दशा
दशमी॥ दशमीलेशसंयुक्तायदिस्यादरुणोदये॥ नैवोपाष्यंवैष्णवेनतद्दिनैकादशीव्रतं॥ इत्यादिभिर्वाक्यैरुरुणोद
येदशमीसत्वेएकादशीविद्धा॥ यद्यपिसौरधर्मेषु॥ आदित्योदयवेलायांपाञ्चमुहूर्तद्वयान्विता॥ सैकादशीतुसंपूर्णाविद्धा
न्यापरिकीर्तितेति॥ तदपिअरुणोदयवेलायांदशमीसत्वेएकादश्याविद्धत्वपरंमुहूर्तस्यारुणोदयपरमाणेत्वात्
अतएवेहमाद्रोस्मृतिः॥ निशीथांतेतुयामार्द्धेदेववादित्रवादने॥ सारस्वतानध्ययनेचारुणोदयउच्यतेति॥ यामा

र्धमपिमुहूर्तद्वयमेव॥ यत्तुउदयात्प्राक्चतस्रनाडिकाअरुणोदयइति॥ तदपिद्वात्रिंशद्घटिकारात्रिमानपक्षेमुहूर्त
द्वयस्यतत्परिमाणत्वादुक्तमितितातचरणाः॥ यदपिब्रह्मवर्तीयं॥ चतस्रोघटिकाःप्रातररुणोदयनिश्चितः॥ चतुष्टयविभागो
त्रेवेधादीनांकिलोदितः॥ अरुणोदयवेधास्यात्सार्धंतुघटिकात्रयं॥ अतिद्व्योद्विघटिकःपक्षालंदर्शनाद्वेधः॥ महावेधोपित
त्रैवदृश्यतेकोर्नदृश्यते॥ तुरीयस्तत्रविहितोयोगःसूर्योदयेसतीसरुणोदयवेधातिवेधमहावेधयोगसंज्ञाकरणमर्वाक्
दोषातिशयार्थंसार्धंतुघटिकात्रयंचतस्रोघटिकाइत्यप्यनुगतव्यवहारार्थंतावत्परिमाणस्यापिमुहूर्तद्वयस्यरात्रिमान
वशेनकदाचित्संभवान्मुहूर्तद्वयारुणोदयपरमेव॥ यत्तुब्रह्मवैवर्तेपि॥ अर्धरात्रंतुकेषांचिद्दृश्यतेवेधइष्यते॥ कपालवेध
मित्याकुराचार्योयेहरिप्रियामितितत्कैमुतकरीत्यारुणोदयवेधनिंदार्थमितिमाधवः॥ यदपिनागः॥ द्वादशनाडिभिर्दिव्यंचदश
भिस्तथा॥ भूतोष्टादशनाडीभिर्दृष्टंयत्युत्तरंतिथिमितिस्कांदोतद्ध्रुवस्योक्तानिगमे॥ सर्वप्रकारवेधोयोमुपवासस्यदूष
कः॥ सार्धसप्तमुहूर्तस्तुयोगोयंबाधतेव्रतमितिव्रतमुपवासमिन्नमितिमाधवः॥ तत्रारुणोदयवेधोवैष्णवविषयः॥ तदा

क्येवैष्णवव्रतदृगात्। परित्रयात्सूर्योदयवेधोवैष्णवभिन्नपरः। तएवस्मार्तपदेनव्यवक्रियंतेग्रंथेषु। वैष्णवलक्षणंतुगोवि
र्णवेगारुडे। वेखानसाद्यागमोक्तदीक्षांप्राप्तोवैष्णवः। माधवीयस्कांदेपि। परमापदमापन्नोहर्षवासमुपस्थिते। नैका
दश्यांजेत्सोययस्यदीक्षास्तुवैष्णवी। अन्यत्र। विष्णर्पितास्विलाचारः सहिवैष्णवउच्यते। भविष्येपि। यथाशुक्लातथाकृ
ष्णातथाकृष्णातथोत्तरा। तुल्येतेमन्यतेयस्तुसववैष्णवउच्यते। तत्रशुक्लैकादशीचतुर्दशी। अधिकादशिका। उभया धिकाउभ
याधिकाचेति। एवंविद्धापिशुद्धायामेकादश्यामाधिक्येदृश्यमः। संपूर्णेकादशीयत्रप्रभातेपुनरेवसा। लुप्यतेद्वादशी तत्रउप
वासःकथंभवेत्। उपोष्यद्वादशीतिथीतत्रविष्णुप्रीणनतत्परैरिति। विष्णुप्रीणनपरावैष्णवाः। नादितस्मार्तान्प्रतिस्कांदे। प्रथमे
हनिसंपूर्णव्याप्याहोरात्रसंयुता। द्वादशीतुतथातद्वदृश्यतेपुनरेवच। पूर्वाकार्याग्रहस्थैश्चयतिभिश्चोत्तराविभोरिति
एतच्चपरेयुर्द्वादश्यभावविषयं। पुनःप्रभातसमयेघटिकैकायदाभवेत्। तत्रोपवासोविहितोवनस्थयतिभिस्तथा। वि ४३
धवायाश्चयतेश्चैवपरतोद्वादशीनचेदिति। शुद्धायांद्वादशीमात्राधिक्येतुनारदः। नचेदेकादशीविद्धौद्वादशीपरतस्थिता

उपोष्यैकादशीतत्रयदिच्छेत्परमंपरमिति विद्धोद्वादश्यां। उभयाधिक्येतुशुद्धाविद्धाचसर्वैः परैवकार्या। संपूर्णेकादशी
तत्रप्रभातेपुनरेवसा। सर्वैरेवोत्तराकार्यापरतोद्वादशीयदि गारुडात्। यत्तुहेमाद्रौपाद्मे। विद्धाप्यविद्धाविज्ञेयापरतोद्व
दशीनचेत्। अधिकापिचविद्धास्यात्परतोद्वादशीयदीति। तदप्युभयदृष्टौज्ञेयंत्रानुभयाधिक्योलसंदेहएवाधिक्येतुपरेचेत्।
एकादशीमात्राधिक्येतुपरेद्युमुपवासः। तदाहव्यासः। एकादशीयदाल्पत्वापरतोद्वादशीभवेत्। उपोष्याद्वादशीतत्रयदी
छेत्परमांगतिमितिमाधवः। तन्न। लोपपदस्यसूर्योदयास्पर्शाख्यत्वेमपसिद्धासूर्योदयगतदशमीविद्धायामेतद्वचनप्र
वृत्तेः। अतोनिर्दशशुद्धान्यूनाधिकद्वादशिकायामुत्तरदिनउपवासविधायकंयदपिकैश्चिदुक्तमिति। तदेतत्परतोयोजितं
तच्चिंत्यं। अकारश्लिष्यमानाभावात्। दिनक्षयेतुपूर्ववद्गृहस्थैर्नोपवासःकार्यः तदाहपितामहः। एकादश्यांदिनक्षयेउप
वासंकरोतियः। तस्यपुत्राविनश्यंतिमघायांपिंडदायथेति। दिनक्षयस्तुपाद्मे। द्वौतिथ्यंतेविकल्पोयस्मिन्तस्यादिनक्षय
इति। दिनक्षयेन्यउपवासनिषेधः सनिराहारःस्यात्। तथाचवायवीये। उपवासनिषेधेतुभक्ष्यंकिंचित्प्रकल्पयेत।

नदुष्यत्युपवासेनउपवासफलंलभेत् नक्तंहविष्यान्नमनोरनेवाफलतिलाक्षीरमथांबुचाज्यंपाने यत्यंचगव्यंयदिवापिवायुः
प्रभास्तमत्रोक्तमुत्तरंचेति व्रतविद्रोषसमन्वितेरे दशम्यांहिमहीपालत्रिदिनंपरिवर्जयेत् गंधतांबूलपुष्पास्त्रीसंभोगं
महाद्यशाइति स्त्रीसंभोगनिषेधस्तुऋतुकालादन्यत्रेत्याह्निकांतेउक्तंस्कांदे कांस्यंमांसमसूरांश्चक्षौद्रंचान्नप्रभाषणं
पुनर्भोजनमत्यादंदशम्यांपरिवर्जयेत् कौर्मे कांस्यंमांसंमसूरांश्चचणकान्कोद्रवांस्तथा शाकंमधुपरान्नंचत्यजेदु
पवासंस्त्रियं माद्ये कांस्यंमांसंसुरांक्षौद्रं तैलंवितथभाषणं व्यायामंचपवासंचदिवास्वापंचमैथुनं तिलपिलपिष्टंम
सूरंचदशम्यादिपुवर्जयेत् दशमींप्रलुलनारदीये अक्षारलवणाःसर्वेहविष्यान्ननिषेविणः। अवनीतलशयनाःस्त्रियासं
गविवर्जिताः अन्यत्रापि दशम्यामेकभुक्तंतुकुर्वीतनियतेंद्रियः रात्रिंनयेज्जतःपश्चात्प्रातःस्नात्वासमाहितउपवासं
तुसंकल्प्यमंत्रपूतंजलंपिबेत् दशम्यामेकभक्तंकाम्येकादशीपरं सायंमध्यंतयोरह्नोः सायंप्रातःमध्यमेउपवासफल
प्रसूर्जल्पाद्भक्तंतुष्टयं. अथनित्योपवासीचेत्सायंप्रातर्भुजिक्रियां वर्जयेन्मूलिवान्निप्रः संप्राप्तेहरिवासरे॥ विष्णुः

दशम्यामेकभक्तंसुमांसमैथुनवर्जितः एकादश्युपवसेत्पक्षयोरुभयोरपि देवतास्तस्यतुष्यंतिकामितंतस्यसिध्यतीति
देवोक्तेश्च अन्येपिदिनत्रयनीयमादित्यव्रतेनावश्यकः ब्रह्मवैवर्ते इतिविज्ञायकुर्वीतावश्यमेकादशीव्रतं विशे
षनियमाशक्तौहरात्रंमुक्तिवर्जितमिति कात्यायनेपि शक्तिर्मास्तिपुनःकुर्यान्नियमन्नविशेषणमितिब्रह्मवैवर्ते पाद्मे
हरिदिनेसम्यक्विधायमंनिमि दशम्यांउपवासस्य प्रकुर्यैवैष्णवंव्रतं देवरुः गृहीत्वौडुंबरंपात्रंवारिपूर्णंमुदङ्मुखः
उपवासंतुगृह्णीयाद्यथासंकल्पयेद्बुधः औडुंबरंताम्रमयं यथासंकल्पयेत्यथाकामंफलंमुक्तिरित्यर्थः वाराहे
इत्युक्त्वार्यततोविद्वान्पुष्पांजलिमथार्पयेत् एकत्रार्यसंकल्पयेदित्यर्थः कात्यायनः अष्टाक्षरेणमंत्रेणत्रिर्जप्तेना
भिमंत्रितं उपवासफलंप्राप्तः पिबेत्पात्रगतंजलं नारदीये दशम्यांसंगदोषेणअर्धरात्रात्परेणतु वर्जयेच्चतुरोयामान्
संकल्पार्चनयास्तया। विद्धोपवासेन्यस्तुदिनंस्वक्षासमाहितः रात्रौसंपूजयेद्विष्णुंसंकल्पंचततश्चरेत् पूजापकार
श्चब्राह्मे एकादश्यामुपक्षेनिराहारसमाहितः नानापुष्पैर्मुनिश्रेष्ठ विचित्रंमंडपंशुभं कृत्वातिशोभनःस्नात्वासम्य

विधानेनसोपवासोजितेंद्रियः संपूज्यविधिवद्विष्णुंपद्मयासुसमाहितः पुष्पैर्गंधैश्चधूपेदीपैर्नैवेद्यकैःपरैः उपचारैर्बहुविधैर्नृपहोमैःप्रदक्षिणैः स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यमनोहरैः दंडवत्प्रणिपातैश्चजपैर्वेदस्तथोत्तमैः एवंसंपूज्यविधिवत् रात्रौकृत्वाप्रजागरं यातिविष्णोः परंस्थानं नरोनास्त्यत्रसंशयः विशेषाद्द्वादश्यांतेन पंचाप्तेनसंपाप्य एकादश्यांजनार्दनं द्वादश्यांपयसास्नाप्यहरिसारूप्यमश्नुते सूतकादौतुवाराहे सूतकेचनस्नात्वाप्रणम्यमनसाहरिं एकादश्यांन भुंजीतव्रतमेवंनलुप्यते मृतकेपिनभुंजीतएकादश्यांसदानरइति स्त्रीणांरजोदर्शनेत्वाद्माधवीये ऋष्यशृंगः संप्रष्टुंपिरजसीनत्वाद्यंद्वादश्यांव्रतंइति एकादश्यांश्राद्धप्राप्तौस्मृमाधवीयेसएव उपवासोयदानित्यः श्राद्धंनैमित्तिकंयदि उपवासंतदाकुर्यादाघ्रायपितृसेवितमिति उपवासासामर्थ्येत्वाद्माधवीयेमार्कंडेयः एकभक्तेननक्तेनतथैवायाचितेन च उपवासेनदानेननिर्द्वादश्यांफलंभवेत् व्रताकरणेप्रायश्चित्तं स्मृत्यंतरे अर्कपर्वद्वयेरात्रौचतुर्दश्यष्टमीदिवा एकदक्षुपामश्चेरात्रंशुक्लाचांद्रायणंचरेदिति ज्येष्ठेशुक्लैकादश्यांनिर्जला ज्येष्ठमासिन्नपक्षेछयाशुक्लैकादशीमवेत् ४५

